१४ संकुसुको यामायनः । १-४ मृत्युः, ५ धाता, ६ त्वष्टा, ७-१४ पितृमेधः, १४ प्रजापतिर्वा । त्रिष्टुप्, ११ प्रस्तारपङ्क्तिः, १३ जगती, १४ अनुष्टुप् ।

परं॑ मृत्यो॒ अनु॒ परे॑हि॒ पन्थां॒ यस्ते॒ स्व इत॑रो दे॒वयाना॑त् ।
चक्षु॑ष्मते शृण्व॒ते ते॑ ब्रवीमि॒ मा न॑: प्र॒जां री॑रिषो॒ मोत वी॒रान् १
मृ॒त्योः प॒दं यो॒पय॑न्तो॒ यदैत॒ द्राघी॑य॒ आयु॑: प्र॒तरं॑ दधा॑नाः ।
आ॒प्याय॑मानाः प्र॒जया॒ धने॑न शु॒द्धाः पू॒ता भ॑वत यज्ञियासः २

---

[१६०] हे सोम ! (यः ते द्रप्सः स्कन्दति) जो तेरा तेजस्वी रस प्रवाहित होता है, (वा यः ते अंशुः अध्वर्योः बाहुच्युतः धिषणायाः उपस्थात्) अथवा जो तेरा अंश–रस अध्वर्युके हाथसे प्रस्तर फलकके पास गिरता है, (वा यः पवित्रात् परि) अथवा जो पवित्रसे क्षरित होता है, (तं ते मनसा वषट् कृतं जुहोमि) उस रसको मनः-पूर्वक वषट्कार रूपमें तुझे अर्पण करता हूं ॥ १२ ॥

[१६१] हे सोम ! (यः ते द्रप्सः स्कन्नः) जो तेरा रस क्षरित हुआ है और (यः ते अंशुः स्रुचा अवः च यः परः) जो तेरा भाग है, जो स्रुचासे यहां तथा प्रवाहित हुआ है, (तं अयं देवः बृहस्पतिः) उस सब सोमका यह बृहस्पति देव (राधसे सं सिञ्चतु) ऐश्वर्य वृद्धिके लिये सेवन करे ॥ १३ ॥

[१६२] हे जल ! (ओषधयः पयस्वतीः) ओषधियां पुष्टियुक्त रससे परिपूर्ण हैं । (मामकं वचः पयस्वन्) मेरा वचन सारयुक्त है । (अपां पयः पयस्वत्) जलोंका सारभूत अंश भी सारयुक्त है, (तेन सह मा शुन्धत) उससे आप साथही मुझे शुद्ध करो ॥ १४ ॥

[१८]

[१६३] हे (मृत्यो) मृत्यु ! (परं पन्थां अनु इहि) तू सबसे भिन्न मार्गसे जा । (परा इहि) दूसरे मार्गका अनुसरण कर । (देवयानात् इतरः यः ते स्वः) जो मार्ग देवयानसे अलग है उस मार्गसेही तू जा; हे (चक्षुष्मते) आंखवाले और (शृण्वते) सब कुछ सुननेवाले ! (ते ब्रवीमि) तुझे नम्रतापूर्वक कहता हू; (नः प्रजां मा रीरिषः उत वीरान् मा) हमारे पुत्र–पौत्र आदिको तथा वीरोंको भी नहीं मारना ॥ १ ॥

[१६४] जो लोग (मृत्योः पदं योपयन्तः यत् ऐत) मृत्युके कारण–मार्गको छोडकर जाते हैं, वे (द्राघीयः प्रतरं आयुः दधानाः) दीर्घ और उत्तम आयुष्य धारण करनेवाले होते हैं । हे (यज्ञियासः) यज्ञशील यजमानों ! तुम (प्रजया धनेन आप्यायमानाः) प्रजा तथा धनसे युक्त होकर (शुद्धाः पूताः भवत) शुद्ध और पवित्र बनकर रहो ॥ २ ॥

+

इमे जीवा वि मृतैराववृत्र — न्नभूद्भद्रा देवहूतिर्नो अद्य ।
प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधानाः ३
इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् ।
शतं जीवन्तु शरदः पुरूची — रन्तर्मृत्युं दधतां पर्वतेन ४
यथाहान्यनुपूर्वं भवन्ति यथ ऋतव ऋतुभिर्यन्ति साधु ।
यथा न पूर्वमपरो जहात्ये — वा धातरायूंषि कल्पयैषाम् ५ [२६]

आ रोहतायुर्जरसं वृणाना अनुपूर्वं यतमाना यति ष्ठ ।
इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः ६
इमा नारीरविधवाः सुपत्नी — राञ्जनेन सर्पिषा सं विशन्तु ।
अनश्रवोऽनमीवाः सुरत्ना आ रोहन्तु जनयो योनिमग्रे ७
उदीर्ष्व नार्यभि जीवलोकं गतासुमेतमुप शेष एहि ।
हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ८ (१७०)

---

[१६५] (इमे जीवाः) ये जीवित मनुष्य (मृतैः वि आववृत्रन्) मृत बन्धुजनोंसे घिरकर न रहें; (अद्य नः देवहुतिः भद्रा अभूत्) आज हमारा पितृ मेध यज्ञ कल्याणकर हो । अनन्तर हम (प्रतरं द्राघीयः आयुः दधानाः) उत्तम दीर्घायुष्य धारण करनेवाले होकर (नृतये हसाय प्राञ्चः अगाम) नृत्य और हास्य–आनन्दके लिये पूर्व दिशाकी ओर मुख करके आगेके मार्गपर बढें ॥ ३ ॥

[१६६] मैं (जीवेभ्यः इमं परिधिं दधामि) जीवनधारी मनुष्योंकी रक्षाके लिये, इस पाषाणकी स्थापना करता हूं; (एषां अपरः एतम् अर्थं मा गात् नु) इनमेंसे कोईभी उस मृत्युके मार्गसे न जावे । ये लोग (शतं शरदः पुरूचीः जीवन्तु) सैकडों वर्ष जीवित रहें और इसलिये (पर्वतेन मृत्युः अन्तः दधताम्) पाषाणसे मृत्युको मैं दूर करता हूं ॥ ४ ॥

[१६७] (यथा अहानि अनुपूर्वं भवन्ति) जैसे दिन एक दूसरेके बाद क्रमसे होते हैं, (यथा ऋतवः ऋतुभिः साधु यन्ति) जैसे ऋतुएं ऋतुओंके पश्चात् बीतती हैं, (यथा पूर्वम् अपरः न जहाति) जैसे पूर्व विद्यमान पितरों आदिको आधुनिक पुत्र आदि त्यागते नहीं [अर्थात् पहलेही मरते नहीं] (एव) ऐसेही हे (धातः) धारण कर्ता प्रभो ! (एषां आयूंषि कल्पय) इनका दीर्घ आयुष्य कर ॥ ५ ॥

[१६८] हे पुत्रादिको ! तुम (जरसं वृणानाः आयुः आ रोहत) वृद्ध होते हुए आयुमें अधिष्ठित रहो; (अनुपूर्वं यतमानाः यति ष्ठ) क्रमसे तुम प्रयत्नशील रहो। (इह सुजनिमा सजोषा त्वष्टा वः जीवसे दीर्घं आयुः करति) इस लोकमें कुलीन त्वष्टा तुम्हें तुम लोगोंके साथ जीनेके लिये दीर्घ आयु करे ॥ ६ ॥

[१६९] (इमाः अविधवाः सुपत्नीः नारीः आंजनेन सर्पिषाः सं विशन्तु) ये सधवा और श्रेष्ठ स्त्रियां घृताञ्जनसे सुशोभित होकर अपने गृहमें प्रवेश करें; वे (अनश्रवः अनमीवाः सुरत्नाः जनयः अग्रे योनिं आ रोहन्तु) अश्रुरहित, नीरोग और आभूषणोंसे युक्त होकर आदरपूर्वक पहले गृहमें आवें ॥ ७ ॥

[१७०] हे (नारि) स्त्रि ! तू (जीवलोकं अभि उत् ईर्ष्व) जीवित लोगोंका विचार करके यहांसे उठो; (एतं गतासुं उप शेषे) तेरा पति मरा हुआ है, इसके पास तुम व्यर्थ सोयी हुई हो; (एहि) इधर आवो । (हस्तग्राभस्य दिधिषोः तव पत्युः) पाणिग्रहण करनेवाले और पोषण करनेवाले तेरे पालक पतिके (इदं जनित्वं अभि सं बभूथ) इस सन्तानको लक्ष्य करके तू उससे मिलकर रह ॥ ८ ॥

धनुर्हस्तादाददानो मृतस्या॒ऽस्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम ९

उप सर्प मातरं भूमिमेता मुरुव्यचसं पृथिवीं सुशेवाम् ।
ऊर्णम्रदा युवतिर्दक्षिणावत एषा त्वा पातु निर्ऋतेरुपस्थात् १० [२७]

उच्छ्वञ्चस्व पृथिवि मा नि बाधथाः सूपायनास्मै भव सूपवञ्चना ।
माता पुत्रं यथा सिचा ऽभ्येनं भूम ऊर्णुहि ११

उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु सहस्रं मित उप हि श्रयन्ताम् ।
ते गृहासो घृतश्चुतो भवन्तु विश्वाहास्मै शरणाः सन्त्वत्र १२

उत ते स्तभ्नामि पृथिवीं त्वत् परी मं लोगं निदधन्मो अहं रिषम् ।
एतां स्थूणां पितरो धारयन्तु तेऽत्रा यमः सादना ते मिनोतु १३

प्रतीचीने मामहनी ष्वाः पर्णमिवा दधुः ।
प्रतीचीं जग्रभा वाच मश्वं रशनया यथा १४ [२८] (१७६)

---

[१७१] (अस्मे क्षत्राय वर्चसे बलाय) अपनी प्रजाके रक्षणके लिये उपयुक्त तेज और बल हमें प्राप्त होवे इसलिये मैं (मृतस्य हस्तात् धनुः आददानः) मृत व्यक्तिके हाथसे धनु लेकर बोलता हूं (त्वं अत्र एव तुम यहीं रहो। (इह वयं सुवीराः) इस राष्ट्रमें हम उत्तम वीर पुत्रवाले होकर (विश्वाः अभिमातीः स्पृधः जयेम) सब अभिमानी शत्रुओंको जीतें ॥ ९ ॥

[१७२] (एतां मातरं उरुव्यचसं पृथिवीं सुशेवां भूमिं उप सर्प) इस मातृस्वरूपिणी, विस्तीर्ण, सर्वव्यापिनी तथा सुखदात्री भूमाताके पास जाओ। (एषा ऊर्णम्रदाः दक्षिणावतः युवतिः) यह ऊनके समान मृदु तथा दान देनेवाले पुरुषकी युवती स्त्री जैसी सर्व स्वामिनी है; वह (त्वा निर्ऋतेः उपस्थात् पातु) तुझे पापाचरणसे बचावे ॥ १० ॥

[१७३] (पृथिवि) पृथिवी ! (उत् श्वञ्चस्व मा नि बाधथाः) इस उच्च स्थानपर ले जा; इसे पीडा नहीं देना। (अस्मै सूपायना सूपवञ्चना भव) इसका अच्छी रीतिसे स्वागत करनेवाली और सुखसे समीप रहनेवाली होओ। हे (भूमे) भूमि ! (यथा माता पुत्रं सिचा) जैसे माता पुत्रको अञ्चलसे ढकती है, वैसे ही (एनं अभि ऊर्णुहि) इसे सब ओरसे आच्छादित कर ॥ ११ ॥

[१७४] (उच्छ्वञ्चमाना पृथिवी सु तिष्ठतु) इसे आच्छादित करनेवाली पृथिवी भली भांति अवस्थित हो; और (सहस्रं मितः उप श्रयन्ताम् हि) सहस्रों धूलियां इसके ऊपर आश्रय लें। (ते घृतश्चुतः गृहासः भवन्तु) वे घृतपूर्ण गृहके समान हों; तथा (अस्मै) इसके लिये (अत्र शरणाः सन्तु) यहां वे सुखदायक आश्रय हों ॥ १२ ॥

[१७५] (ते पृथिवीं उत् स्तभ्नामि) तेरे ऊपर भूमिको उत्तम रीतिसे योजित करता हूं; (इमं लोगं त्वत् परि निदधत् अहं मो रिषम्) तुम्हारी ऊपर मैं यह लोढा रखता हूं; मैं तुझे कष्ट नहीं देता हूं; (ते एतां स्थूणां पितरः धारयन्तु) तेरे इस टेकको पितर लोग धारण करें; (अत्र यमः ते सादना मिनोतु) यहां यम तेरे लिये निवासस्थान कर दे ॥ १४ ॥

[सप्तमोऽध्यायः ॥७॥ व० १-३०] (१९)

८ मथितो यामायनः, भृगुर्वारुणिर्वा, भार्गवश्च्यवनो वा । आपः, गावो वा,
१ उत्तरार्धर्चस्य अग्नीषोमौ। अनुष्टुप्, ६ गायत्री ।

नि वर्तध्वं मानु गाताऽस्मान् त्सिषक्त रेवतीः ।
अग्नींषोमा पुनर्वसू अस्मे धारयतं रयिम् १

पुनरेना नि वर्तय पुनरेना न्या कुरु ।
इन्द्र एणा नि यच्छ त्वग्निरेना उपाजतु २

पुनरेता नि वर्तन्ता मस्मिन् पुष्यन्तु गोपतौ ।
इहैवाग्ने नि धारये ह तिष्ठतु या रयिः ३

यन्नियानं न्ययनं संज्ञानं यत् परायणम् ।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ४

य उदानड् व्ययनं य उदानट् परायणम् ।
आवर्तनं निवर्तन मपि गोपा नि वर्तताम् ५

---

[१७६] (इष्वाः पर्ण इव) जैसे बाणके मूलमें 'पर्ण'– पांख लगाते हैं, (प्रतीचीने अहनि मां आ दधुः) वैसे ही सर्व पूज्य दिनमें देवोंने मुझे रखा है; (यथा रशनया अश्वं) जैसे शीघ्रगामी अश्वको रस्सीसें रोका जाता है, वैसेही (प्रतीचीं वाचं आ जग्रभ) मेरी पूज्य स्तुतिको रखो ॥ १४ ॥

[१९]

[१७७] हे गौओ ! (नि वर्तध्वं) तुम हमारे पास लौट आओ; (मा अनु गात) हमारे सिवा दूसरेके पास मत जाओ; (रेवतीः अस्मान् सिषक्त) हे धनवती गायो ! हमें दुग्ध दान करके सेवित करो; (पुनर्वसू अग्नि-सोमा) बार बार धन देनेवाले अग्नि और सोम ! तुम (अस्मे रयिं धारयतम्) हमें धन दो ॥ १ ॥

[१७८] (एना पुनः निवर्तय) तू इन गायोंको फिर लौटा; (एना पुनः नि आ कुरु) इन्हें बार बार हमारे वशमें कर ! (इन्द्रः एना नि यच्छतु) इन्द्रभी इन्हें तुम्हें सहाय्यभूत होकर तुम्हारे वशमें करें; (अग्निः एना उपाजतु) अग्नि इन्हें उपयोगिनी करें ॥ २ ॥

[१७९] (एताः पुनः निवर्तन्ताम्) ये गायें बार बार लौटकर मेरे पास आवे; (अस्मिन् गोपतौ पुष्यन्तु) गौओंके पालक मेरे अधीन होकर पुष्ट होवें । हे (अग्नि) अग्नि देव ! (इह एव नि धारय) इस स्थानमें ही इनको मेरे पास तू रख; (या रयिः इह तिष्ठतु) और जो धन है वह यहां स्थिर रूपसे रहे ॥ ३ ॥

[१८०] (यत् नियानं न्ययनं संज्ञानं) मैं जो गोष्ठ–गोशाला, गौओंके गृह आनेकी, गौओंके नियमसे लौट आना, (यत् परायणं आवर्तनं निवर्तनं) जो पहचानना, रहना, चरनेके लिये जाना, फिर लौटकर आना, और (यः गोपाः तं अपि हुवे) गो रक्षक गोपालकी भी इच्छा करता हूं ॥ ४ ॥

[१८१] (यः गोपाः व्ययनं उदानट्) जो गोपाल चारों ओर गायोंको खोज करता है, (यः परायणं उदानट्) जो उनके साथ जानेका अनुभव करता है, (आवर्तनं निवर्तनं अपि नि वर्तताम्) जो गायोंको घरपर ले आता है और जो गायें चराता है, वह कुशलपूर्वक घरपर लौट आवे ॥ ५ ॥

आ निवर्त नि वर्तय पुनर्न इन्द्र गा देहि । जीवाभिर्भुनजामहै ६ (१८२)
परि वो विश्वतो दध ऊर्जा घृतेन पयसा ।
ये देवाः के च यज्ञियास्ते रय्या सं सृजन्तु नः ७
आ निवर्तन वर्तय नि निवर्तन वर्तय ।
भूम्याश्चतस्रः प्रदिशस्ताभ्य एना नि वर्तय ८ [१] (१८४)

(२०)

१० ऐन्द्रो विमदः, प्राजापत्यो वा, वासुक्रो वसुकृद्वा । अग्निः । गायत्री, १ एकपदा विराट् (एष मन्त्रः शान्त्यर्थः), २ अनुष्टुप्, ९ विराट् १० त्रिष्टुप् ।

भद्रं नो अपि वातय मनः १
अग्निमीळे भुजां यविष्ठं शासा मित्रं दुर्धरीतुम् ।
यस्य धर्मन् त्स्व१रेनीः सपर्यन्ति मातुरूधः २
यमासा कृपनीळं भासाकेतुं वर्धयन्ति । भ्राजते श्रेणिदन् ३
अर्यो विशां गातुरेति प्र यदानड् दिवो अन्तान् । कविरभ्रं दीद्यानः ४
जुषद्धव्या मानुषस्योर्ध्वस्तस्थावृभ्वा यज्ञे । मिन्वन् त्सद्म पुर एति ५

---

[१८२] हे (इन्द्र) इन्द्र ! (आ निवर्त निवर्तय) तू हमारी ओर होओ; गायोंको हमारी ओर करो; (नः पुनः गाः देहि) हमें बार बार गायें दो ! (जीवाभिः भुनजामहै) उनके कारण हम उपभोग कर सकें ॥ ६ ॥

[१८३] हे (देवाः) देवो ! (वः ऊर्जा घृतेन पयसा विश्वतः परि दधे) मैं तुम लोगोंको विपुल अन्न, घृत और दुग्ध आदि पदार्थ सब प्रकारसे समर्पण करता हूं; (ये के च यज्ञियाः देवाः) जो कोई भी यज्ञाई देवता हैं, (ते नः रय्या सं सृजन्तु) वे हमें धनसे सम्पन्न करें ॥ ७ ॥

[१८४] हे (निवर्तन) चरवाहा ! आ वर्तय निवर्तन निवर्तन नि वर्तय) गायोंको मेरे पास ले आओ; हे गायों, तुम भी आओ । हे चरवाहा, गायोंको लौटाओ । (भूम्याः चतस्रः प्रदिशः ताभ्यः एनाः निवर्तय) भूमिकी चार दिशाएं हैं, उन सबसे उनको रोककर उनको फिर लौटाओ ॥ ८ ॥

[२०]

[१८५] हे अग्नि देव ! (नः मनः भद्रं अपि वातय) तू हमारे मनको शुभ संकल्पसे युक्त कर ॥ १ ॥

[१८६] (भुजां अग्निं यविष्ठं शासा मित्रं दुर्धरीतुं ईळे) हविका भोग करनेवाले देवोंमें अतीव युवक, शासक, सबके मित्र और अपराजित अग्निकी मैं स्तुति करता हूं; (यस्य धर्मन् एनीः मातुः ऊधः यस्य स्वः सपर्यन्ति) जिसके यज्ञमें उसे प्राप्त करके सब देवता माताके स्तनके समान अपनी आहुतियोंका सेवन करते हैं ॥ २ ॥

[१८७] (यम् कृपनीडं भासाकेतुं आसा वर्धयन्ति) जिस कर्माधार और तेजस्वी अग्निको स्तोता लोग उपासना-स्तोत्रोंसे वर्धित करते हैं, (श्रेणिदन् भ्राजते) वह कल्याण करनेवाला अग्नि अत्यंत शोभित होता है ॥ ३ ॥

[१८८] (विशां अर्यः गातुः) अग्नि यजमानोंके लिये आश्रणीय है; (यत् दिवः अन्तान् प्र आनट्) जब प्रदीप्त होकर ऊपर उठता है, तब वह द्युलोक तक व्याप्त कर लेता है; (अभ्रं दीद्यानः कविः प्र एति) मेघोंको भी प्रकाशित करके विद्वान् अग्नि उत्तम पद पर स्थित है ॥ ४ ॥

[१८९] (मानुषस्य यज्ञे हव्या जुषत् ऊर्ध्वः तस्थौ) मनुष्यके यज्ञमें हविका सेवन करनेवाला अग्नि ज्वालायुक्त होकर ऊपर उठता है, तब वह (सद्म मिन्वन् पुरः एति) वेदीको मापता हुआ सामने आता है ॥ ५ ॥

स हि क्षेमो हविर्यज्ञः श्रुष्टीदस्य गातुरेति । अग्निं देवा वाशीमन्तम् ६ [२]

यज्ञासाहं दुव इषेऽग्निं पूर्वस्य शेवस्य । अद्रेः सूनुमायुमाहुः ७
नरो ये के चास्मदा विश्वेत् ते वाम आ स्युः । अग्निं हविषा वर्धन्तः ८
कृष्णः श्वेतोऽरुषो यामो अस्य ब्रध्न ऋज्र उत शोणो यशस्वान् ।
हिरण्यरूपं जनिता जजान ९
एवा ते अग्ने विमदो मनीषामूर्जो नपादमृतेभिः सजोषाः ।
गिर आ वक्षत् सुमतीरियान इषमूर्जं सुक्षितिं विश्वमाभाः १० [३] (१९४)

(२१)

८ ऐन्द्रो विमदः, प्राजापत्यो वा, वासुक्रो वसुकृद्वा । अग्निः । आस्तारपङ्क्तिः ।

आग्निं न स्ववृक्तिभिर्होतारं त्वा वृणीमहे ।
यज्ञाय स्तीर्णबर्हिषे वि वो मदे शीरं पावकशोचिषं विवक्षसे १

[१९०] (सः हविः यज्ञः क्षेमः हि) वह अग्नि ही हवि, यज्ञ और कल्याण करनेवाला है; (अस्य गातुः श्रुष्टी इत्) यही देवोंके पास बुलानेके लिये जाता है, (देवाः वाशीमन्तम् अग्निं) देवता भी उस स्तुत्य अग्निके साथ आते हैं ॥ ६ ॥

[१९१] देवोंको बुलानेवाले (आयुम् आहुः) सबका जीवन ऐसे (अग्निं) अग्निको (अद्रेः सूनुम्) लोग पत्थरका पुत्र कहते हैं, और जो (यज्ञासाहं) यज्ञके धारक है, उस अग्निकी (पूर्वस्य शेवस्य) उत्कृष्ट सुखकी प्राप्तिके लिये (दुव इषे) सेवा करनेकी मैं अभिलाषा करता हूं ॥ ७ ॥

[१९२] (अस्मत् ये के च नरः) हमारे जो भी पुत्र, पौत्रादि उत्तम पुरुष हैं, (ते) वे सब (अग्निं हविषा वर्धन्तः) अग्निका हवि द्वारा संवर्धन करते हुए (विश्वा इत् वामे आ स्युः) समस्त प्रकारसे श्रेष्ठतम संपत्तिमें रहें, ऐसी हम आशा करते हैं ॥ ८ ॥

[१९३] (अस्य) अग्निका (यामः) रथ (कृष्णः श्वेतः अरुषः बभ्रः ऋजः) कृष्ण वर्ण, शुभ्रवर्ण, तेजस्वी, लाल, सरल-गन्ता (उत्) और (शोणः यशस्वान्) वेगवान् एवं यशस्वी, संपन्न है; इसको (जनिता हिरण्यरूपं जजान) प्रजापतिने सुवर्ण सदृश उज्ज्वल बनाया है ॥ ९ ॥

[१९४] (एव) इस प्रकार हे (अग्ने) तेजस्वी बलपुत्र अग्नि ! (अमृतेभिः सजोषाः) तुम अमर धनसे युक्त हो । (सुमतीः इयानः विमदः) अपनी उत्तम बुद्धिकी इच्छा करनेवाले विमद ऋषिने (ते मनीषां गिरः आ वक्षत्) तेरे लिये अपनी मनकी उत्तम भावना युक्त स्तुति- स्त्रोत्रोंको कहा है । हे (ऊर्जे नपात्) बलके देनेवाले ! तू (इषं ऊर्जं सुक्षितिं विश्वं) अन्न, बल और योग्य निवास तथा जो सब कुछ देने योग्य है, वह सब प्रदान कर ॥ १० ॥

[२१]

[१९५] (स्तीर्णबर्हिषे यज्ञाय) बिछे विस्तृत कुशवाले आसनोंसे युक्त यज्ञके लिये, (स्ववृक्तिभिः होतारं) अपनी बनायी स्तुतियोंसे देवोंको बुलानेवाले और (पावकशोचिषं शीरं) पवित्र प्रकाशमय तथा सर्वव्यापक (अग्निं न त्वा आ वृणीमहे) अग्नि, तुझको हम वरण करते हैं; (वः मदे वि) और हम आनन्दके लिये अपनाते हैं । तू (विवक्षसे) उसको धारण कर ॥ १ ॥

त्वामु ते स्वाभुवः शुम्भन्त्यश्वराधसः ।
वेति त्वामुपसेचनी वि वो मद ऋजीतिरग्न आहुतिर्विवक्षसे २
त्वे धर्माण आसते जुहूभिः सिञ्चतीरिव ।
कृष्णा रूपाण्यर्जुना वि वो मदे विश्वा अधि श्रियो धिषे विवक्षसे ३ (१९७)
यमग्ने मन्यसे रयिं सहसावन्नमर्त्य ।
तमा नो वाजसातये वि वो मदे यज्ञेषु चित्रमा भरा विवक्षसे ४
अग्निर्जातो अथर्वणा विदद्विश्वानि काव्या ।
भुवद्दूतो विवस्वतो वि वो मदे प्रियो यमस्य काम्यो विवक्षसे ५ [४]
त्वां यज्ञेष्वीळते ऽग्ने प्रयत्यध्वरे ।
त्वं वसूनि काम्या वि वो मदे विश्वा दधासि दाशुषे विवक्षसे ६
त्वां यज्ञेष्वृत्विजं चारुमग्ने नि षेदिरे ।
घृतप्रतीकं मनुषो वि वो मदे शुक्रं चेतिष्ठमक्षभिर्विवक्षसे ७

---

[१९६] (अश्वराधसः स्वाभुवः ते त्वा शुम्भन्ति) तेजस्वी और धनसम्पन्न वे यजमान तुझे सुशोभित करते हैं। हे (अग्ने) तेजस्वी अग्नि ! (उपसेचनी ऋजीतिः आहुतिः वि मदे त्वां वेति) क्षरणशील और सरल जानेवाली आहुति तृप्तीके लिये तुम्हारे पास जाती है; तू (विवक्षसे) उसे धारण करता है और बढता है ॥ २ ॥

[१९७] जैसे (सिञ्चनीः इव) जल सींचन करके पृथिवीकी सेवा करता है, वैसेही (धर्माणः जुहूभिः त्वे आसते) यज्ञके धारक ऋत्विक् होमपात्रोंसे तुम्हारी सेवा करते हैं; (मदे) सब देवोंके आनन्दके लिये तू (कृष्णा अर्जुना रूपाणि) कृष्ण, सफेद ज्वालारूप (विश्वाः श्रियः) सब प्रकारकी शोभाको (धिषे) धारण करता है; और हे (अग्नि) अग्नि देव ! (विवक्षसे) तू महान् है ॥ ३ ॥

[१९८] हे (अग्ने) तेजस्वी अग्नि ! हे (सहसावन् अमर्त्य) बलशाली तथा अमर ! तू (यं रयिं चित्रं मन्यसे) जिस धनको श्रेष्ठ, आश्चर्यकारक मानता है, तू (तम्) उसको (नः वाजसातये) हमारे बल और अन्नवृद्धिके लिये और (वि मदे) देवोंकी तृप्तिके लिये (यज्ञेषु आ भर) यज्ञोंमें हमारे निमित्त ले आओ ! तू (विवक्षसे) महान् शक्तिशाली है ॥ ४ ॥

[१९९] (अथर्वणा अग्निः जातः) अथर्वा ऋषिने अग्निको उत्पन्न किया था; (विश्वानि काव्या विदद्) वह सब प्रकारके स्तुति-स्तोत्रोंको जानता है। वह (काम्यः विवस्वतः यमस्य दूतः भुवत्) सबके इच्छनीय होकर देवोंको बुलानेके लिये यजमानका दूत भी हो। वह (वः वि मदे) तुम्हारे आनन्द और सुखोंके लिये हो। वह (विवक्षसे) सत्यही गुणवान्, महान् और समर्थ है ॥ ५ ॥

[२००] हे (अग्ने) अग्नि देव ! (यज्ञेषु अध्वरे प्रयति त्वाम् ईयते) ऋत्विक् और यजमान यज्ञ कार्योंके आरम्भ होनेपर तुम्हारी स्तुति करते हैं; और (त्वं) तू (विश्वा काम्या वसूनि वि दधासि) सब प्रकारके अभिलषित धनोंको विशेष करके धारण करता है; (वः मदे दाशुषे) तू लोगोंके आनन्द और कल्याणके लिये दानशील हो, इस लिये (विवक्षसे) तुम महान् पूज्य हो ॥ ६ ॥

[२०१] हे (अग्ने) अग्नि देव ! (यज्ञेषु घृतप्रतीकं ऋत्विजं) यज्ञोंमें घृतसे प्रदीप्त, तेजस्वी तथा ऋत्विजोंके साथ होते हुए, (चारुं शुक्रं चेतिष्ठम्) सुन्दर, समर्थ और अत्यंत ज्ञानी (त्वां मनुषः वः मदे नि षेदिरे) तुझको यजमान लोग तृप्तीके लिये स्थापित करते हैं; (विवक्षसे) तुम महान् हो ॥ ७ ॥

अग्ने॑ शु॒क्रेण॑ शो॒चिषो॒रु प्र॑थयसे बृ॒हत् ।
अ॒भि॒क्रन्द॑न् वृषायसे॒ वि वो॒ मदे॒ गर्भं॑ दधासि जा॒मिषु॑ विव॑क्षसे　　८ [५] (२०२)

(२२)

१५ ऐन्द्रो विमदः प्राजापत्यो वा, वासुक्रो वसुकृद्वा । इन्द्रः । पुरस्ताद्बृहती; ५,७,९ अनुष्टुप्; १५ त्रिष्टुप् ।

कुह॑ श्रु॒त इन्द्रः॒ कस्मि॑न्न॒द्य जने॑ मि॒त्रो न श्रू॑यते ।
ऋषी॑णां॒ वा॒ यः क्षये॒ गुहा॑ वा॒ चर्कृ॑षे गि॒रा　　१

इ॒ह श्रु॒त इन्द्रो॑ अ॒स्मे अ॒द्य स्तवे॑ व॒ज्र्यृची॑षमः ।
मि॒त्रो न यो जने॒ष्वा यश॑श्च॒क्रे अ॒साम्या　　२

म॒हो यस्पतिः॒ शव॑सो अ॒साम्या म॒हो नृ॒म्णस्य॑ तू॒तु॒जिः ।
भ॒र्ता वज्र॑स्य धृ॒ष्णोः पि॒ता पु॒त्रमि॑व प्रि॒यम्　　३

यु॒जा॒नो अश्वा॒ वात॑स्य॒ धुनी॑ दे॒वो दे॒वस्य॑ वज्रिवः ।
स्यन्ता॑ प॒था वि॒रुक्म॑ता सृजा॒नः स्तो॒ष्यध्व॑नः　　४

---

[२०२] हे (अग्ने) तेजस्वी अग्निदेव ! तू (बृहत्) महान् है; तू (शुक्रेण शोचिषा उरु प्रथयसे) प्रदीप्त तेजसे अत्यंत प्रसिद्ध होते हो । (अभिक्रन्दन् वृषायते) समरके समय दर्पित वृषके समान शब्द करते हुए अत्यंत बलवान् होते हो; तू (जामिषु गर्भं दधासि) ओषधियोंमें बीज धारण करते हो; (वः वि मदे विवक्षसे) मद उत्पन्न होनेपर तुम महान् होते हो ॥ ८ ॥

[२२]

[२०३] (इन्द्रः कुह श्रुतः) इन्द्र आज कहां प्रख्यात है ? (अद्य मित्रः न कस्मिन् जने श्रूयते) आज मित्रके समान वह इन्द्र किस जनसमूहमें विख्यात होता होगा ? (यः ऋषीणां क्षये वा गुहा वा गिरा चर्कृषे) जो ऋषियोंके आश्रममें या गुहामें स्तुतियोंसे उपासित होता है वह इन्द्र आज कहां होगा ? ॥ १ ॥

[२०४] (अद्य इह इन्द्रः श्रुतः) आज इस यज्ञमें इन्द्र प्रमुख है; (वज्री ऋचीषमः अस्मे स्तवे) आज हम वज्रधर और स्तुत्य इन्द्रकी स्तुति करते हैं । (यः जनेषु मित्रः न असामि यशः आ चक्रे) जो इन्द्र लोगोंमें मित्रके समान है तथा पूर्ण रूपसे यश, कीर्ती उत्पन्न करता है ॥ २ ॥

[२०५] (यः महः शवसः पतिः) जो इन्द्र महान् बलका अधिपति, (असामि महः नृम्णस्य तूतुजिः) और अमर्याद महान् धनोंका दाता है; (धृष्णोः वज्रस्य भर्ता) वह शत्रुओंके नाशक वज्रका धारक है; वह (प्रियं पुत्रं इव पिता) पिता जैसे प्रिय पुत्रकी रक्षा करता है, वैसेही हमारी रक्षा करे ॥ ३ ॥

[२०६] हे (वज्रिवः) वज्रधर इन्द्र ! (देवः) तुम द्युतिमान् हो; (देवस्य वातस्य धुनी विरुक्मता पथा स्यन्ता अश्वा युजानः) तुम वायु देवसे भी वेगवान् प्रेरक उचित मार्गसे जानेवाले दोनों अश्वोंको रथमें जोतकर, और (अध्वनः सृजानः स्तोषि) मार्गको उत्पन्न करता हुआ सदा स्तुत्य होते हो ॥ ४ ॥

त्वं त्या चिद्वातस्याश्वागा ऋज्रा त्मना वहध्यै ।
ययोर्देवो न मर्त्यो यन्ता नकिर्विदाय्यः ५ [६]

अध ग्मन्तोशना पृच्छते वां कदर्था न आ गृहम् ।
आ जग्मथुः पराकाद् दिवश्च ग्मश्च मर्त्यम् ६

आ न इन्द्र पृक्षसे ऽस्माकं ब्रह्मोद्यतम् ।
तत् त्वा याचामहेऽवः शुष्णं यद्धन्नमानुषम् ७ (२०९)

अकर्मा दस्युरभि नो अमन्तु-रन्यव्रतो अमानुषः ।
त्वं तस्यामित्रहन् वधर्दासस्य दम्भय ८

त्वं न इन्द्र शूर शूरै-रुत त्वोतासो बर्हणा ।
पुरुत्रा ते वि पूर्तयो नवन्त क्षोणयो यथा ९

त्वं तान् वृत्रहत्ये चोदयो नॄन् कार्पाणे शूर वज्रिवः ।
गुहा यदी कवीनां विशां नक्षत्रशवसाम् १० [७]

---

[२०७] हे इन्द्र ! (त्वं त्या चित् वातस्य ऋज्रा अश्वा) तू उन दोनों वायुके समान वेगवाले और सरल गामी अश्वोंको (त्मना वहध्यै आ अगाः) अपने सामर्थ्यसे चलाकर हमारे समक्ष जाते हो; (ययोः न देवः न मर्त्यः यन्ता) जिन दोनों अश्वोंको सञ्चालन कर सके ऐसा कोई भी देवोंमें और मनुष्योंमें नहीं है; और (न किः विदाय्यः) न कोई इनके बलको जान सके ॥ ५ ॥

[२०८] यज्ञ समाप्तिके बाद (उशनाः अध ग्मन्ता वां पृच्छते) जिस समय-इन्द्र और अग्नि अपने स्थानों को जाने लगे, उस समय भार्गव उशनाने तुमसे पूछा कि- (कदर्थाः पराकाद् दिवः ग्मः च) किस प्रयोजनसे तुम लोग इतनी दूरसे- द्युलोक और भूलोकसे- (नः मर्त्यं गृहं आ जग्मतुः) हम मनुष्योंके गृहपर आये हो ? ॥ ६ ॥

[२०९] हे (इन्द्र) इन्द्र देव ! तू (नः आ पृक्षसे) हमें सब प्रकारसे संरक्षण दो । (अस्माकं ब्रह्म उद्यतम्) हमने इस यज्ञकी सामग्री, हमारा महान् स्तवन तेरे लिये समर्पित की है । (त्वा तत् अमानुषम् अवः याचामहे) हम तुझसे उसी अमानुष -उत्तम बलकी- रक्षणकी याचना करते हैं, (यत् शुष्णं हन्) जिससे तुमने शुष्ण-राक्षसका नाश किया ॥ ७ ॥

[२१०] हे (अमित्रहन्) शत्रुनाशक इन्द्र ! जो (अकर्मा अमन्तुः अन्यव्रतः अमानुषः दस्युः नः अभि) कर्महीन, सबका अपमान करनेवाला, यज्ञादि कर्मोंसे शून्य, आसुरी वृत्तिसे परिपूर्ण दस्यु हमारी चारों ओर घेरे पडा है, (त्वं तस्य दासस्य वधः दम्भय) तू उस दस्यु जातिको दण्ड देकर विनष्ट कर ॥ ८ ॥

[२११] हे (शूर इन्द्र) पराक्रमी इन्द्र ! (त्वं नः शूरैः उत) तू हमारी रक्षा शूर मरुतोंके साथ कर; (बर्हणा त्वा ऊतासः) तुझसे रक्षित होकर हम संग्राममें तेरे बलसे शत्रु विनाशमें समर्थ होंगे । (ते पूर्तयः पुरुत्रा) तेरे इच्छा पूर्ण करनेके साधन बहुत हैं । (यथा क्षोणयः विनवन्त) तेरे भक्त स्वामीके समान तेरी अनंत विविध स्तोत्रोंसे स्तुति करते हैं ॥ ९ ॥

[२१२] हे (शूर वज्रिवः) शूर वज्रधर इन्द्र ! (त्वं वृत्रहत्ये कार्पाणे तान् नॄन् चोदयः) तू वृत्र-वध-शत्रुओंका नाश-के लिये संग्राममें योद्धाओंको प्रेरित करते हो; (यदि कवीनां नक्षत्रशवसाम् विशां गुहा) जिस समय तुम विद्वान् स्तोताओंका नक्षत्रवासी देवोंके प्रति उत्तम स्तोत्र सुनते हो ॥ १० ॥

+

मक्षू ता त इन्द्र दानाप्नस आक्षाणे शूर वज्रिवः ।
यद्ध शुष्णस्य दम्भयो जातं विश्वं सयावभिः ११
माकुध्र्यगिन्द्र शूर वस्वी रस्मे भूवन्नभिष्टयः ।
वयंवयं त आसां सुम्ने स्याम वज्रिवः १२
अस्मे ता त इन्द्र सन्तु सत्या ऽहिंसन्तीरुपस्पृशः ।
विद्याम यासां भुजो धेनूनां न वज्रिवः १३
अहस्ता यदपदी वर्धत क्षाः शचीभिर्वेद्यानाम् ।
शुष्णं परि प्रदक्षिणिद् विश्वायवे नि शिश्नथः १४
पिबापिबेदिन्द्र शूर सोमं मा रिषण्यो वसवान वसुः सन् ।
उत त्रायस्व गृणतो मघोनो महश्च रायो रेवतस्कृधी नः १५ [८] (२१७)

(२३)

७ ऐन्द्रो विमदः प्राजापत्यो वा, वासुक्रो वसुकृद्वा । इन्द्रः । जगती, १, ७ त्रिष्टुप्, ५ अभिसारिणी ।

यजामह इन्द्रं वज्रदक्षिणं हरीणां रथ्यं विव्रतानाम् ।
प्र श्मश्रु दोधुवदूर्ध्वथा भूद् वि सेनाभिर्दयमानो वि राधसा १

---

[२१३] हे (शूर वज्रिवः इंद्र) शूर वज्रधर इंद्र ! (यत् ह सयावभिः शुष्णस्य विश्वं जातं दम्भयः) जिस निश्चयसे तुमने मरुतोंके साथ शुष्णके सारे वंशका विनाश किया है; (आक्षाणे दानाप्नसः ते ता मक्षू) युद्ध क्षेत्रमें कृपापूर्ण दानरूप कर्म करनेवाले तेरे वे कर्म अत्यंत शीघ्र ही हुए हैं ॥ ११ ॥

[२१४] हे (शूर इन्द्र) शूरवीर इन्द्र ! (अस्मे अभिष्टयः वस्वीः अकुध्र्यग् मा भूवन्) हमारी इच्छाएं और धन सम्पदाएं कभी निष्फल न हों; हे (वज्रिवः) वज्रधर ! (वयं वयं ते सुम्ने आसां स्याम) हम सब सदा तेरी रक्षामें फलद्रुप होकर सदा सुखमें रहें ॥ १२ ॥

[२१५] हे (इन्द्र) इन्द्र ! (अस्मे ता ते उपस्पृशः सत्या अहिंसन्तीः सन्तु) हमारी वे अभिलाषा और स्तुतियां तेरे पास पहुंचकर सत्य और तुम्हें प्रसन्न करनेवाली होकर अहिंसक हों । हे (वज्रिवः) वज्रधर ! (यासां धेनूनां न भुजः विद्याम) जिनके फलस्वरूप गौओंके दूधके समान हम तुम्हारे प्रसादका फल भोगें ॥ १३ ॥

[२१६] (यद्) जैसे (वेद्यानां शचीभिः) विद्वान् लोगों और तेरे सम्बन्धी यज्ञ क्रियाओं द्वारा (अहस्ता अपदी क्षाः वर्धत) यह पृथिवी हस्त-पाद-शून्या होकर भी बढती है, तब (विश्वायवे परि प्रदक्षिणित्) समस्त लोगोंके कल्याणके लिये पृथिवीकी चारों ओरसे प्रदक्षिणा करके (शुष्णं नि शिश्नथः) दुष्ट शुष्ण असुरको मार दिया ॥ १४ ॥

[२१७] हे (शूर इन्द्र) पराक्रमी इन्द्र ! तू (सोमं पिब पिब) सोमका शीघ्र पान करो; हे (वसवान) धनवान् इन्द्र ! तू (वसुः सन् मा रिषण्यः) स्वयं धनी हो, इस लिये रक्षक होकर हमारी हिंसा मत कर । (उत गृणतः मघोनः त्रायस्व) परंतु स्तोता यजमानकी रक्षा कर; (नः महः रायः) हमारे विपुल धन हों और (रेवतः कृधी) तू हमे धनवान बना ॥ १५ ॥

[२३]

[२१८] (वज्रदक्षिणं विव्रतानाम् हरीणां रथ्यं इन्द्रं यजामहे) दायें हाथमें वज्र धारण करनेवाले, विविध कर्म कुशल हरितवर्ण अश्वोंको रथमें जोतनेवाले इन्द्रकी हम उपासना करते हैं । सोमपानके अनन्तर वह (श्मश्रु प्र दोधुवत्) अपने केशोंको बार बार हिलाकर (सेनाभिः राधसा वि दयमानः) विस्तृत सेनासहित और विपुल धनों-अन्न आदिको लेकर शत्रुओंका नाश करके (वि ऊर्ध्वथा भूत्) विविध प्रकारसे सर्वोपरि हुआ ॥ १ ॥

हरी न्व॑स्य या वने॑ वि॒दे वस्वि॑न्द्रो॑ म॒घैर्म॒घवा॑ वृत्र॒हा भु॑वत् ।
ऋ॒भुर्वाज॑ ऋभु॒क्षाः प॑त्यते॒ शवो ऽव॑ क्ष्णौमि॒ दास॑स्य॒ नाम॑ चित् २
य॒दा वज्रं॒ हिर॑ण्य॒मिद॒था रथं॒ हरी॑ यम॑स्य॒ वह॑तो॒ वि सूरिभिः॑ ।
आ तिष्ठति म॒घवा॒ सन॑श्रुत॒ इन्द्रो॒ वाज॑स्य दी॒र्घश्र॑वस॒स्पतिः॑ ३
सो चि॒न्नु वृ॒ष्टिर्यू॒थ्या॒३॑ स्वा सचाँ॒ इन्द्रः॒ श्मश्रू॑णि॒ हरि॑ता॒भि प्रु॑ष्णुते ।
अव॑ वेति सु॒क्षयं॑ सु॒ते मधू॒द्दिद्धू॑नोति॒ वातो॒ यथा॒ वन॑म् ४
यो वा॒चा विवा॑चो मृ॒ध्रवा॑चः पु॒रू स॒हस्राशि॑वा ज॒घान॑ ।
तत्त॒दिद॑स्य॒ पौंस्यं॑ गृणीमसि पि॒तेव॒ यस्तवि॑षीं वावृ॒धे शवः॑ ५ (२२२)

स्तोमं॑ त इन्द्र विम॒दा अ॑जीजन॒न्नपू॑र्व्यं पुरु॒तमं॑ सु॒दान॑वे ।
वि॒द्मा ह्य॑स्य॒ भोज॑नमि॒नस्य॒ यदा प॒शुं न गो॒पाः क॑रामहे ६
माकि॑र्न ए॒ना स॒ख्या वि यौ॑षु॒स्तव॑ चेन्द्र विम॒दस्य॑ च॒ ऋषेः॑ ।
वि॒द्मा हि ते॒ प्रम॑तिं देव जामि॒वद॒स्मे ते॑ सन्तु स॒ख्या शि॒वानि॑ ७ [९] (२२४)

---

[२१९] (या हरी नु अस्य वने वसु विदे) इन्द्रके इन दो अश्वोंने यज्ञमें (आहुतियोंके रूपमें) धन प्राप्त किया है; (मघैः मघवा इन्द्रः वृत्रहा भुवत्) उन्हींसे प्राप्त विपुल धनोंका स्वामी होकर इन्द्रने वृत्रको नष्ट किया । वह (ऋभुः वाजः ऋभुक्षाः शवः पत्यते) तेजस्वी, बलवान् और आश्रयदाता इन्द्र बल और धनका अधिपति है । मैं (दासस्य नाम चित् अव क्ष्णौमि) दस्यु जातिका-शत्रुओंका नाम तक को नष्ट कर देना चाहता हूं ॥ २ ॥

[२२०] (यदा इन्द्रः हिरण्यं वज्रं) जब इन्द्र सुवर्णमय-तेजस्वी वज्रको धारण करता है, (अस्य यं रथं हरी वहतः) इसका जो रथ हरितवर्णवाले दो अश्वोंके साथ जाता है, तब (सूरिभिः वि आ तिष्ठति) वह उसीपर विद्वानोंके साथ विविध प्रकारसे बैठता है । (मघवा सनश्रुतः वाजस्य दीर्घश्रवसः पतिः) इन्द्र दानादिसे विख्यात, बहुश्रुत और अन्न-धनादि ऐश्वर्यका अधिपति है ॥ ३ ॥

[२२१] जैसे (सो चित् नु वृष्टिः) वही उत्तम वर्षा है जो (स्वासचाँ यूथ्या) अपने पशु-समूहको सिंचती है; वैसेही (इन्द्रः हरिता श्मश्रूणि अभि प्रुष्णुते) इन्द्र हरितवर्ण सोमरसके द्वारा अपनी मूंछ भिगोता है । फिर वह (सुते सुक्षयं अव वेति) सुंदर यज्ञ गृहमें जाता है और (मधु वेति) वहां जो मधुर सोमरस रहता है, उसे पीकर (यथा वातः वनं उद् धुनोति) जैसे वायु वनको कंपाती है, वैसेही शत्रुओंको त्रस्त करता है ॥ ४ ॥

[२२२] (विवाचः मृध्रवाचः) विपरीत नाना प्रकारके वचन बोलनेवाले शत्रु लोगोंको (यः वाचा) जो इन्द्र अपने वचनसे चुप करके, (पुरु सहस्रा अशिवा जघान) अनेक सहस्र शत्रुओंका संहार करता है; और (यः पिता इव तविषीं शवः वावृधे) जो पिताके समान मनुष्योंका बल बढाता और अन्नसे वृद्धि करता है, हम (अस्य तत् तत् इत् पौंस्यं गृणीमसि) इसके ही उस उस सामर्थ्यका वर्णन करते हैं ॥ ५ ॥

[२२३] हे (इन्द्र) इन्द्र ! (ते सुदानवे) तुझे उत्तम दाता जानकर (अपूर्व्यं पुरुतमं स्तोमं) अत्यंत अनुपम, सबसे श्रेष्ठ स्तोत्र हम (विमदाः अजीजनन्) विमद वंशीय विद्वानोंने धन प्राप्तिके लिये बनाया है । (अस्य इनस्य भोजनं आ विद्म हि) उस तुझ स्वामीके ऐश्वर्यको हम जानते हैं और (पशुं न गोपाः) जैसे गोपालक पशुको अपने पास बुलाता है, वैसेही हम (आ करामहे) धनप्राप्तिके लिये तुझे बुलाते हैं ॥ ६ ॥

[२२४] हे (इन्द्र) इन्द्र ! (तव च विमदस्य ऋषेः च) तेरे और विमद ऋषिके (एना सख्या न माकिः वि यौषुः) साथ जो मैत्रीभाव है, वह कोई न तोडे और ये कभी नष्ट न होवें । हे (देव) देव ! (जामिवत् सख्या प्रमतिं विद्म हि) हम तेरे भाईके प्रति भगिनीके समान जो मित्रताके भाव हैं, उस तेरी बुद्धिको जानते हैं; (ते अस्मे शिवानि सन्तु) वे तेरे मित्र-प्रेमभाव हमारे लिये कल्याणकारी हों ॥ ७ ॥

(२४)

६ ऐन्द्रो विमदः, प्राजापत्यो वा, वासुक्रो वसुकृद्वा । इन्द्रः, ४-६ अश्विनौ ।
आस्तारपङ्क्तिः, ४-६ अनुष्टुप् ।

इन्द्र सोम॑मि॒मं पि॑ब॒ मधु॑मन्तं च॒मू सु॒तम् ।
अ॒स्मे र॒यिं नि धा॑रय॒ वि वो॒ मदे॑ सह॒स्रिणं॑ पुरूवसो॒ विव॑क्षसे १
त्वां य॒ज्ञेभि॑रु॒क्थै॒रुप॑ ह॒व्येभि॑रीमहे ।
शची॑पते शची॒नां वि वो॒ मदे॒ श्रेष्ठं॑ नो धेहि॒ वार्यं॒ विव॑क्षसे २
यस्पति॒र्वार्या॑णा॒मसि॑ र॒ध्रस्य॑ चोदि॒ता ।
इन्द्र॑ स्तोतॄ॒णाम॑वि॒ता वि वो॒ मदे॑ द्वि॒षो नः॑ पा॒ह्यंह॑सो॒ विव॑क्षसे ३
यु॒वं श॑क्रा माया॒विना॑ समी॒ची निर॑मन्थतम् ।
वि॒मदे॑न॒ यदी॑ळि॒ता नास॑त्या नि॒रम॑न्थतम् ४
विश्वे॑ दे॒वा अ॑कृपन्त समी॒च्योर्नि॒ष्पत॑न्त्योः ।
नास॑त्यावब्रुवन् दे॒वाः पुन॒रा व॑हता॒दिति॑ ५
मधु॑मन्मे प॒राय॑णं॒ मधु॑म॒त् पुन॒राय॑नम् ।
ता नो॑ देवा दे॒वत॑या यु॒वं मधु॑मतस्कृतम् ६ [१०] (२३०)

[२४]

[२२५] हे (इन्द्र) इन्द्र ! (चमू सुतं इमं मधुमन्तं सोमं पिब) प्रसर फलकोंके ऊपर रगडा जाकर तुम्हारे लिये तैयार किया हुआ इस मधुर सोमरसका पान करो । हे (पुरूवसो) विपुल धनवाले इन्द्र ! तू (अस्मे सहस्रिणं रयिं नि धारय) हमें सहस्रोंसे प्रचुर धन दो; (वः विमदे विवक्षसे) तू सबके लिये सत्यही महान् हो ॥ १ ॥

[२२६] हे (शचीपते) शचीपति इन्द्र ! हम (यज्ञेभिः उक्थैः हव्येभिः उप) यज्ञों, मन्त्रों और होमीय वस्तुओं द्वारा (ईमहे) तुम्हारी आराधना करते हैं । तू (शचीनां श्रेष्ठं वार्यं नः धेहि) सब कर्मोंका सर्वोत्तम अभिलषित फल हमें दे; (वः वि मदे विवक्षसे) वह सचमुच महान् है ॥ २ ॥

[२२७] हे (इन्द्र) इन्द्र ! (यः वार्याणां पतिः असि) जो तू अभिलषित धनोंका स्वामी है; (रध्रस्य चोदिता) आराधकको साधना कार्यमें प्रोत्साहित करनेवाला और (स्तोतॄणां अविता) स्तोताओंका संरक्षक है; वह तू (नः द्विषः अंहसः पाहि) हमें शत्रुओंसे और पापसे बचाओ । (वि वः मदे विवक्षसे) तू सत्यही अत्यंत महान् हो ॥ ३ ॥

[२२८] हे (मायाविना शक्रा) समर्थ कर्मनिष्ठ अश्विद्वय ! (युवं समीची निरमन्थतम्) बुद्धिमान तुम दोनोंने परस्पर मिलकर अग्निका मंथन किया । (नासत्या यद् विमदेन ईडिता निरमन्थतम्) सत्यरूप तुमने, जब विमदने तुम्हारी स्तुति की, तब अग्निको उत्पन्न किया ॥ ४ ॥

[२२९] हे (विश्वेः देवाः) अश्वि देव ! (समीच्योः निष्पतन्त्योः अकृपन्त) जब दोनों अरणियां परस्पर घर्षित होकर अग्नि स्फुलिंग बाहर होने लगे, तब सब देवता तुम्हारी स्तुति करने लगे । (देवाः नासत्यौ अब्रुवन्) देवता अश्विद्वयको बोलने लगे (पुनः आ वहतात् इति) फिर ऐसा करो ॥ ५ ॥

[२३०] हे अश्वि देव ! (मे परायणं मधुमत्) मेरा बाहर जाना स्नेहयुक्त हो और (पुनरायनं मधुमत्) पुनः लौट आना भी वैसा ही मधुर प्रीतियुक्त हो । हे (देवाः) देव ! इसी प्रकार (युवं देवतया नः मधुमतः कृतम्) तुम दोनों अपनी दिव्य शक्तिसे हमें मधुर प्रीतिसे युक्त बनाओ ॥ ६ ॥

(२५)

११ ऐन्द्रो विमदः, प्राजापत्यो वा, वासुक्रो वसुकृद्वा । सोमः । आस्तारपङ्क्तिः ।

भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् ।
अधा ते सख्ये अन्धसो वि वो मदे रणन् गावो न यवसे विवक्षसे १
हृदिस्पृशस्त आसते विश्वेषु सोम धामसु ।
अधा कामा इमे मम वि वो मदे वि तिष्ठन्ते वसूयवो विवक्षसे २
उत व्रतानि सोम ते प्राहं मिनामि पाक्या ।
अधा पितेव सूनवे वि वो मदे मृळा नो अभि चिद्वधाद्विवक्षसे ३ (२३३)
समु प्र यन्ति धीतयः सर्गासोऽवताँ इव ।
क्रतुं नः सोम जीवसे वि वो मदे धारया चमसाँ इव विवक्षसे ४
तव त्ये सोम शक्तिभिर्निकामासो व्यृण्विरे ।
गृत्सस्य धीरास्तवसो वि वो मदे व्रजं गोमन्तमश्विनं विवक्षसे ५ [११]

---

[२५]

[२३१] हे सोम ! (नः भद्रं मनः अपि वातय) हमें कल्याणकारी विचारोंसे युक्त मन प्राप्त करा; (दक्षं उत क्रतुम्) वह निपुण और कर्मनिष्ठ कर । (यवसे न गावः) जैसे चारेके इच्छुक गायें, उसे प्राप्त कर प्रसन्न होती हैं, वैसेही (ते सख्ये अन्धसः रणन्) हम तेरे प्रीतियुक्त होकर अन्न आदि प्राप्त कर आनन्दमय होते हैं । (वि वः मदे विवक्षसे) कारण तू महान् है ॥ १ ॥

[२३२] हे (सोम) सोम ! (हृदि स्पृशः विश्वेषु धामसु ते आसते) तुम्हारे मनको प्रसन्न करनेवाली तेरी स्तुति करके पुरोहित लोग चारों ओर बैठते हैं । (अध इमे वसूयवः मम कामाः वि तिष्ठन्ते) और ये सब धन प्राप्तिके लिये मेरे मनमें अनेक कामनाएं उत्पन्न होती हैं । (वः वि मदे विवक्षसे) सत्यही तुम अत्यंत महान् हो ॥ २ ॥

[२३३] (उत) और हे (सोम) सोम ! (अहं पाक्या ते व्रतानि प्र मिनामि) में अपनी परिणत बुद्धिसे तेरे कर्मोंको प्राप्त करता हूं । तू प्रसन्न होकर (वधात् अभि चित्) हमें शत्रु-संहार करके विनाशसे बचाकर, (सुनवे पिता इव नः मृड) जैसे पिता पुत्रका संरक्षण करता है, वैसेही हमारा पालन करके सुखी कर । (वः वि मदे विवक्षसे) कारण तू महान् है ॥ ३ ॥

[२३४] हे (सोम) सोम ! (सर्गासः अवतान् इव) जैसे कलश जल निकालनेके लिए कुएमें जाता है, वैसे ही (नः धीतयः) हमारी सब स्तुतियां (सं उ प्र यन्ति) तुझतक पहुंचती हैं। (क्रतुं नः जीवसे) हमारी प्राणरक्षा-के लिये- दीर्घायुष्यत्वके लिये इस यज्ञको सफल कर। ((चसमान् इव धारय) तेरी प्रसन्नताके लिये इन पान पात्रोंको धारण कर । (वः विमदे विवक्षसे) सत्य ही तू महान् है ॥ ४ ॥

[२३५] हे (सोम) सोम ! (त्ये निकामासः धीराः) वे विविध फलाभिलाषी निग्रही बुद्धिमान् ऋत्विज् (शक्तिभिः तवसः गृत्सस्य तव वि ऋण्विरे) अनेक प्रकारके कर्मोंको करनेवाले बलशाली तेरी स्तुति करते हैं । तू प्रसन्न होकर (गोमन्तं अश्विनं व्रजं) गौ और अश्वसे युक्त गोशाला हमें दे । (वः वि मदे विवक्षसे) कारण तू महान् और मेधावी है ॥ ५ ॥

पशुं नः सोम रक्षसि पुरुत्रा विष्ठितं जगत् ।
समाकृणोषि जीवसे वि वो मदे विश्वा संपश्यन् भुवना विवक्षसे ६
त्वं नः सोम विश्वतो गोपा अदाभ्यो भव ।
सेध राजन्नप स्रिधो वि वो मदे मा नो दुःशंस ईशता विवक्षसे ७
त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि ।
क्षेत्रवित्तरो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे ८
त्वं नो वृत्रहन्तमेन्द्रस्येन्दो शिवः सखा ।
यत् सीं हवन्ते समिथे वि वो मदे युध्यमानास्तोकसातौ विवक्षसे ९
अयं घ स तुरो मद इन्द्रस्य वर्धत प्रियः ।
अयं कक्षीवतो महो वि वो मदे मतिं विप्रस्य वर्धयद्विवक्षसे १०
अयं विप्राय दाशुषे वाजाँ इयर्ति गोमतः ।
अयं सप्तभ्य आ वरं वि वो मदे प्रान्धं श्रोणं च तारिषद्विवक्षसे ११ [१२] (२४१)

---

[२३६] हे (सोम) सोम ! (नः पशुं रक्षसि) तू हमारे पशुओंकी रक्षा करता है; और (पुरुत्रा विष्ठितं जगत्) तू नाना प्रकारसे फैले हुए– स्थित जगत्की भी रक्षा करता है। तू (विश्वा भुवना संपश्यन् जीवसे समाकृणोषि) सारे भुवनोंका अन्वेषण करके हमारे प्राण धारणके लिये जीवनोपयोगी सब पदार्थोंकी व्यवस्था करता है। (वः वि मदे विवक्षसे) सबके सुखके लिये तू महान् है ॥ ६ ॥

[२३७] हे (सोम) सोम ! (त्वं अदाभ्यः) तू अविनाशी अमर है; (नः विश्वतः गोपाः भव) तू हमारा सब प्रकारसे रक्षक होओ। हे (राजन्) राजन् ! (स्रिधः अप सेध) हमारे शत्रुओंको दूर कर; (दुःशंसः नः मा ईशात) हमारा निन्दक हमारा कुछ न करने पावे; (वः वि मदे विवक्षसे) कारण तू महान् है ॥ ७ ॥

[२३८] हे (सोम) सोम ! (त्वं सुक्रतुः वयः धेयाय जागृहि) तू उत्तम कर्म करनेवाला है; तू हमें अन्न देनेके लिये सदा जागृत रह। (क्षेत्रवित्तरः) हमें निवासस्थान देनेके लिये तू अद्वितीय है; (नः द्रुहः अंहसः मनुषः पाहि) तू हमारी द्रोही मनुष्यसे और पापसे रक्षा कर। (वः वि मदे विचक्षसे) तू महान् है ॥ ८ ॥

[२३९] हे (वृत्रहन्तम इन्दो) वृत्रके नाश करनेवाले सोम ! (यत् तोकसातौ समिथे सीं हवन्ते) जिस समय अपनी सन्तानोंके संहारक संग्राममें योद्धा शत्रु चारों ओरसे युद्धके लिये हमें बुलाते हैं, (इन्द्रस्य शिवः सखा) उस समय इन्द्रके कल्याणकारी सहायक तुम हमारा भी सखा होते हो; (वः विमदे विवक्षसे) कारण तुम महान् हो ॥ ९ ॥

[२४०] (स अयं घ तुरः मदः इद्रस्य प्रियः) वह यह निश्चयसेही शीघ्र कार्य करनेवाला, उत्साहवर्धक, मदकर और इन्द्रके प्रिय होकर (वर्धत) वृद्धिको प्राप्त होता है। (अयं महः कक्षीवतः विप्रस्य मतिं वर्धयत्) और इसने महा बुद्धिवान् कक्षीवान् ऋषिकी बुद्धिको बढाया था; (वः वि मदे विवक्षसे) तुम महान् हो ॥ १० ॥

[२४१] (अयं दाशुषे विप्राय गोमतः वाजान् इयर्ति) यह सोम दानशील मेधावी यजमानको पशुयुक्त अन्न और भोग्य पदार्थोंको देता है; (अयं सप्तभ्यः वरं आ) यही सातो होताओंको श्रेष्ठ धन देता है; (अन्धं श्रोणं च प्रतारिषत्) और अंधे दीर्घतमा ऋषिको नेत्र और लंगडे परावृज ऋषिको पैर दिये थे; (वः वि मदे विवक्षसे) सत्यही तू महान् है ॥ ११ ॥

(२६)

९ ऐन्द्रो विमदः, प्राजापत्यो वा, वासुक्रो वसुकृद्वा । पूषा । अनुष्टुप्; १, ४ उष्णिक् ।

प्र ह्यच्छा मनीषाः स्पार्हा यन्ति नियुतः ।
प्र दस्रा नियुद्रथः पूषा अविष्टु माहिनः १

यस्य त्यन्महित्वं वाताप्यमयं जनः ।
विप्र आ वंसद्धीतिभिश्चिकेत सुष्टुतीनाम् २

स वेद सुष्टुतीनामिन्दुर्न पूषा वृषा ।
अभि प्सुरः प्रुषायति व्रजं न आ प्रुषायति ३

मंसीमहि त्वा वयमस्माकं देव पूषन् ।
मतीनां च साधनं विप्राणां चाधवम् ४

प्रत्यर्धिर्यज्ञानामश्वहयो रथानाम् ।
ऋषिः स यो मनुर्हितो विप्रस्य यावयत्सखः ५ [१३] (२४६)

आधीषमाणायाः पतिः शुचायाश्च शुचस्य च ।
वासोवायोऽवीनामा वासांसि मर्मृजत् ६

---

[२६]

[२४२] (नियुतः स्पार्हाः मनीषाः हि अच्छ प्रयन्ति) अतीव स्पृहणीय प्रेमयुक्त उच्चारित स्तोत्र तुम्हें प्राप्त होवें; (नियुद् रथः माहिनः पूषा दस्रा प्र अविष्टु) सदा रथको जोतनेवाले महान् पूषादेव हमारी रक्षा करे ॥ १ ॥

[२४३] (अयं विप्रः जनः यस्य वाताप्यं त्यत् महित्वं) यह मेधावी मनुष्य जिस पूषा देवताके जीवनप्रद जलके भाण्डारके महान् सामर्थ्यको (धीतिभिः आ वंसत्) अपनी स्तुतियों द्वारा उपभोग करता है, वह ही पूषा देव (सु-स्तुतीनां चिकेत) उत्तम स्तुति-स्तोत्रोंको जानता-सुनता है ॥ २ ॥

[२४४] (इन्दुः न सः पूषा वृषा सुस्तुतीनां वेद) सोमके समान यह पूषा देव भी इच्छाओंको परिपूर्ण करनेवाला है और वह उत्तम स्तोत्रोंको जानता- सुनता है; (प्सुरः अभि प्रुषायति) वह रूपवान् पूषा कृपाजल वृष्टि करता है और वह (व्रजं नः आ प्रुषायति) हमारे गोष्ठमें भी जलका सिंचन करता है ॥ ३ ॥

[२४५] हे (पूषन् देव) पूषा देव ! (वयं अस्माकं मतीनां साधनं) हम अपनी बुद्धियोंको प्रेरित करनेवाला और (विप्राणां च आधवं च त्वा) बुद्धिमानोंका आधार तुझे (मंसीमहि) जानकर स्तवित करते हैं ॥ ४ ॥

[२४६] (यः यज्ञानां प्रत्यर्धिः रथानां अश्वहयः) जो पूषा यज्ञके अर्धांशका भागी और रथोंमें घोडे जोतकर जाता है, (सः ऋषिः मनुः हितः विप्रस्य सखः यवयत्) वह सर्वदर्शक, मनुष्योंका हितकर्ता, बुद्धिमानोंका मित्र है और वह उनके शत्रुओंको दूर कर देता है ॥ ५ ॥

[२४७] (आधीषमाणायाः शुचायाः चः शुचस्य पतिः) सब प्रकारसे धारण करनेमें समर्थ तेजस्वी स्त्री-पुरुषात्मक पशुओंके स्वामी पूषा है; (वासः वायः अवीनां वासांसि मर्मृजत्) वही भेडकी ऊनके वस्त्र बनाता है और धोकर स्वच्छ करता है ॥ ६ ॥

इनो वाजानां पतिं--रिनः पुष्टीनां सखा ।
प्र श्मश्रु हर्यतो दूधोद् वि वृथा यो अदाभ्यः ७
आ ते रथस्य पूषन्न्नजा धुरं ववृत्युः ।
विश्वस्यार्थिनः सखा सनोजा अनपच्युतः ८
अस्माकमूर्जा रथं पूषा अविष्टु माहिनः ।
भुवद्वाजानां वृध इमं नः शृणवद्धवम् ९ [१४] (२५०)

(२७)

२४ ऐन्द्रो वसुक्रः । इन्द्रः । त्रिष्टुप् ।

असत् सु मे जरितः साभिवेगो यत् सुन्वते यजमानाय शिक्षम् ।
अनाशीर्दामहमस्मि प्रहन्ता सत्यध्वृतं वृजिनायन्तमाभुम् १
यदीदहं युधये संनयान्यदेवयून् तन्वा३ शूशुजानान् ।
अमा ते तुम्रं वृषभं पचानि तीव्रं सुतं पञ्चदशं नि षिञ्चम् २

---

[२४८] वह प्रभु पूषा (वाजानां इनः पतिः) सब हविद्रव्योंका, अन्नके स्वामी, (पुष्टीनां इनः सखा और सबके लिये पुष्टिकर तथा मित्र है; (यः हर्यतः अदाभ्यः श्मश्रु वृथा प्र दूधोद्) वही तेजस्वी और दुर्धर्ष पूषा क्रीडास्थानमें अपने बालोंको हिलाता है ॥ ७ ॥

[२४९] हे (पूषन्) पूषा देव ! तू (विश्वस्य अर्थिनः सखा) समस्त याचकोंकी मनःकामना पूर्ण करनेवाला मित्र है, तू (सनोजाः अनपच्युतः) अजन्मा और अपने अधिकारसे न हुआ अविनाशी है। (ते रथस्य धुरं अजाः ववृत्युः) तेरे रथकी धुराका वहन छाग करते हैं ॥ ८ ॥

[२५०] (माहिनः पूषा अस्माकं रथं ऊर्जा अविष्टु) महान् पूषा देव अपने बलसे हमारे रथकी रक्षा करे; वह (वाजानां वृधे भुवत्) अन्नकी वृद्धि करे; और (न इमं हवं शृणवत्) हमारी इस प्रार्थनाको सुने ॥ ९ ॥

[२७]

[२५१] हे (जरितः) स्तोता ! (मे सः अभिवेगः सु असत्) मेरा वह स्वभाव-वेग सदा रहता है (यत्) कि मैं (सुन्वते यजमानाय शिक्षम्) सोम-यज्ञके अनुष्ठाता यजमानको अभिलषित फल देता हूं । (अहं) मैं (अनाशीः दां सत्यध्वृतं वृजिनायन्तं आभुं प्रहन्ता अस्मि) जो मुझे होमीय द्रव्य नहीं देता, सत्यको नष्ट करता है और जो चारों ओर पापाचरण करता फिरता है, उसका सर्वनाश करता हूं ॥ १ ॥

[२५२] (यदि इत् अहं) जब भी मैं (अदेवयून् तन्वा शुशूजानान्) ईश्वरकी पूजा-आराधना न करने वाले और शरीर बलके कारण अविनीत लोगोंके साथ (युद्धये संनयानि) युद्ध करनेके लिये जाता हूं तब मैं, हे इन्द्र ! (ते अमी तुम्रं वृषभं पचानि) तेरे लिये पुष्ट वृषभका पाक करता हूं; (तीव्रं सुतं पञ्चदशं निषिञ्चम्) मैं पन्द्रह तिथियोंमेंसे प्रत्येक तिथिको सोमरस प्रस्तुत करता हूं ॥ २ ॥

नाहं तं वेद य इति ब्रवी- त्यदेवयून् त्समरणे जघन्वान् ।
यदावाख्यत् समरणमृघाव- दादिद्ध मे वृषभा प्र ब्रुवन्ति ३

यदज्ञातेषु वृजनेष्वासं विश्वे सतो मघवानो म आसन् ।
जिनामि वेत् क्षेम आ सन्तमाभुं प्र तं क्षिणां पर्वते पादगृह्य ४

न वा उ मां वृजने वारयन्ते न पर्वतासो यदहं मनस्ये ।
मम स्वनात् कृधुकर्णो भयात एवेदनु द्यून् किरणः समेजात् ५ [१५]

दर्शन्नवत्र शृतपाँ अनिन्द्रान् बाहुक्षदः शरवे पत्यमानान् ।
घृषुं वा ये निनिदुः सखाय- मध्यू न्वेषु पवयो ववृत्युः ६

अभूर्वौक्षीर्व्यु१ आयुरानड् दर्षन्नु पूर्वो अपरो नु दर्षत् ।
द्वे पवस्ते परि तं न भूतो यो अस्य पारे रजसो विवेष ७

गावो यवं प्रयुता अर्यो अक्षन् ता अपश्यं सहगोपाश्चरन्तीः ।
हवा इदर्यो अभितः समायन् कियदासु स्वपतिश्छन्दयाते ८ (२५८)

---

[२५३] (अदेवयून् समरणे जघन्वान्) देवद्वेष्टाओंको संग्राममें मारा है, (यः इति ब्रवीति) जो ऐसा कहता है, (तं अहं न वेद) उसको मैं नहीं जानता; (यद् ऋघावत् समरणं अवाख्यत्) जब हिंसायुक्त संग्राममें जाकर मैं उनका संहार करता हूं, सब (आत इत् मे वृषभा प्रब्रुवन्ति) सब उस मेरे वीरतायुक्त कर्मोंका वर्णन करते हैं ॥३॥

[२५४] (यत् अज्ञातेषु वृजनेषु आसन्) जब मैं अनजानते सहसा युद्धमें प्रवृत्त होता हूं, तब (विश्वे मघवानः सतः मे आसन्) सब महान् सज्जन ऋषि मुझे घेर लेते हैं, (क्षेमे आ सन्तं आभुं जिनामि वा इत्) सब जगतके कल्याण तथा रक्षणके लिये सर्वत्र फैले शत्रुका भी नाश करता हूं; (तं पादगृह्य पर्वते प्र क्षिणाम्) उसके पैर पकडकर उसे पर्वतपर फेंक देता हूं ॥ ४ ॥

[२५५] (मां वृजने न वा उ वारयन्ते) मुझे युद्धमें निवारण करनेवाला कोई भी नहीं है; (यद् अहं मनस्ये न पर्वतासः) यदि मैं चाहूं तो पर्वत भी मेरा निरोध नहीं कर सकते। (मम स्वनात् कृधुकर्णः भयाते) मेरे शब्दसे बधिर व्यक्ति भी भयभीत होता है; (एव इत् अनुद्यून् किरणः समेजात्) ऐसेही प्र तदिन सूर्य भी कांपता है ॥५॥

[२५६] मैं (अत्र अनिन्द्रान् शृतपान् बाहुक्षदः शरवे पत्यमानान् दर्शन्) इस जगतमें मुझ इन्द्रको न माननेवाले, देवोंके लिये प्रस्तुत सोमरस बल पूर्वक पीनेवाले–हविद्रव्यका उपभोग करनेवाले, बाहें भांजते हुए हिंसा करनेके लिये दौडनेवाले लोगोंको देखता हूं। (ना ये घृषुं सखायं) और उनको भी देखता हूं जो अपने सहायक मित्रकी (निनिदुः) निन्दा करते हैं, (एषु उनु पवयः अधि ववृत्युः) उन पर निश्चयसे मेरे वज्रका प्रहार होता है ॥ ६ ॥

[२५७] हे इन्द्र ! (अभूः उ) तुमने प्रकट होकर दर्शन दिया, (औक्षीः) और वृष्टि भी बरसायी; तू (आयुः आनट्) दीर्घजीवी है। (पूर्वः नु दर्षत् अपरः नु दर्षत्) तू पहले शत्रुका विदारण किया था और पश्चात् भी किया था; (यः अस्य रजसः पारे विवेष) जो इस लोकके पार भी व्याप रहा है, (द्वे पवस्ते तं न परि भूतः) ये सर्वव्यापक द्यावा–पृथिवी उसको नहीं माप सकते ॥ ७ ॥

[२५८] (प्रयुताः गावः चरन्तीः यवम्) अनेक गायें एकत्र होकर यव आदिको खा रही हैं; (अर्यः ताः सहगोपाः चरन्तीः अपश्यम्) स्वामीके समान मैं गायोंकी देखभाल करता हूं और मैं देखता हूं कि वह चरवाहोंके साथ चर रही हैं। (हवाः इत् अर्यः अभितः समायन्) बुलानेपरही वह गायें अपने स्वामीके चारों ओर एकत्र हो जाती हैं; (आसु स्वपतिः कियत् छन्दयाते) उनसे स्वामीने प्रचुर दूधका दोहन कर लिया है ॥ ८ ॥

+

सं यद्वयं यवसादो जनाना–महं यवाद उर्वज्रे अन्तः ।
अत्रा युक्तोऽवसातारमिच्छा–दथो अयुक्तं युनजद्ववन्वान् ९
अत्रेदु मे मंससे सत्यमुक्तं द्विपाच्च यच्चतुष्पात् संसृजानि ।
स्त्रीभिर्यो अत्र वृषणं पृतन्या–दयुद्धो अस्य वि भजानि वेदः १० [१६]

यस्यानक्षा दुहिता जात्वास कस्तां विद्वाँ अभि मन्याते अन्धाम् ।
कतरो मेनिं प्रति तं मुचाते य ईं वहाते य ईं वा वरेयात् ११
कियती योषा मर्यतो वधूयोः परिप्रीता पन्यसा वार्येण ।
भद्रा वधूर्भवति यत् सुपेशाः स्वयं सा मित्रं वनुते जने चित् १२
पत्तो जगार प्रत्यञ्चमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम् ।
आसीन ऊर्ध्वामुपसि क्षिणाति न्यङ्ङुत्तानामन्वेति भूमिम् १३
बृहन्नच्छायो अपलाशो अर्वा तस्थौ माता विषितो अत्ति गर्भः ।
अन्यस्या वत्सं रिहती मिमाय कया भुवा नि दधे धेनुरूधः १४

[२५९] (यत् उर्वज्रे अन्तः वयं जनानां यवसादः) इस महान् जगतमें तृण खानेवाले हम ही हैं, (अहं यवादः सं) हम ही अन्न–यव खानेवाले हैं, सब एकत्रही हैं; (अत्र युक्तः अवसातारं इच्छात्) इस लोकमें समाहित चित्त होकर मनुष्य ईश्वरकी इच्छा करे, उसकी उपासना करे; (अथ ववन्वान् अयुक्तं युनजत्) और वह प्रभु असंयमी योगशून्य मनुष्यको सन्मार्गमें लगाता है ॥ ९ ॥

[२६०] (अत्र इत् उ मे उक्तं सत्यं मंससे) यहां ही मैं जो मेरे विषयमें कहता हूं, वह सत्य है, यह तू निश्चयसे जान; (यत् द्विपात् च चतुष्पात् च संसृजानि) जो भी द्विपाद मनुष्य–पक्षी और चतुष्पाद पशु हैं, उनको मैं उत्पन्न करता हूं। (अत्र यः स्त्रीभिः वृषणं पृतन्यात्) इस जगतमें जो स्त्रियोंके समान पराधीन पुरुषोंसे युक्त होकर वीर्यवान् मुझसे युद्ध करता है, (अयुद्धः अस्य वेदः वि भजानि) युद्धके विनाही उसका धन हरकर मैं दूसरोंको दे देता हूं ॥ १० ॥

[२६१] (यस्य अनक्षा दुहिता जातु आस) जिसकी नेत्रसे रहित कन्या है, (कः विद्वान् तां अन्धां अभि मन्याते) कौन विद्वान् उस अन्धी कन्याको अपना आश्रय देगा ? (यः ईं वहाते यः ईं वरेयात्) जो इसको धारण करता है, जो इसको रोकता है, (तं मेनिं कतरः प्रति मुचाते) उस वज्रको कौन धारण करता है ?

[२६२] (कियती योषा वधूयोः मर्यतः पन्यसा वार्येण परिप्रीता) कितनी स्त्रियां ऐसी हैं जो स्त्रीकी इच्छा करनेवाले मनुष्यके स्तुतियुक्त वचन और धनसे उसपर आसक्त हो जाती हैं; (यत् भद्रा सुपेशाः वधूः भवति) परंतु जो कल्याणप्रद और सुरूप स्त्री है, (सा जने चित् मित्रं स्वयं वनुते) वह मनुष्योंके बीच अपने मनके अनुकूल मित्र पुरुषको पतिरूपसे स्वीकार करती है ॥ १२ ॥

[२६३] आदित्य देव (पत्तः जगार) अपनी किरणोंसे प्रकाशको व्यक्त करता है; और (प्रत्यञ्चं अत्ति) और अपनेमें स्थित प्रकाशका गृहण करके, (शिरः वरूथं शीर्ष्णा प्रति दधौ) अपने मस्तकको ढकनेवाली किरणोंको इस जगत्के ऊपर वर्षता है। वह (ऊर्ध्वां उपसि आसीनः क्षिणाति) ऊपर विद्यमान तेजस्वी दीप्तिके समीप स्थित होकर उसे क्षीण करके, (उत्तानां भूमिं न्यङ् अनु एति) नीचे विस्तृत पृथिवीपर अपनी किरणोंसे प्राप्त होता है ॥ १३ ॥

[२६४] (बृहन्, अच्छायः अपलाशः अर्वा तस्थौ) वह आदित्य महान्, तम–अन्धकार रहित, नित्य और सतत गमन करनेवाला है; (माता विषितः गर्भः अत्ति) इसी प्रकार यह सर्वोत्पादक, व्यापक और जगत्को धारण

सप्त वीरासो अधरादुदाय-न्नष्टोत्तरात्तात् समजग्मिरन्ते ।
नव पश्चातात् स्थिविमन्त आयन् दश प्राक् सानु वि तिरन्त्यश्नः　　१५ [१७]

दशानामेकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय ।
गर्भं माता सुधितं वक्षणा-स्ववेनन्तं तुषयन्ती बिभर्ति　　१६

पीवानं मेषमपचन्त वीरा न्युप्ता अक्षा अनु दीव आसन् ।
द्वा धनुं बृहतीमप्स्व१न्तः पवित्रवन्ता चरतः पुनन्ता　　१७

वि क्रोशनासो विष्वञ्च आयन् पचाति नेमो नहि पक्षदर्धः ।
अयं मे देवः सविता तदाह द्र्वन्न इद्वनवत् सर्पिरन्नः　　१८

अपश्यं ग्रामं वहमानमारा-दचक्रया स्वधया वर्तमानम् ।
सिषक्त्यर्यः प्र युगा जनानां सद्यः शिश्ना प्रमिनानो नवीयान्　　१९

करनेवाला आदित्य हवि खाता है । (धेनुः अनस्याः वत्सं रिहती) यह द्युलोक रूपिणी गौ दूसरी गौ- अदिति- के बच्चेको प्रेमसे स्थापित करती है; वह (कया भुवा ऊधः नि दधे) किस भावसे गौ के स्तन समान अन्तरिक्षमें धारण करती है ॥ १४ ॥

[२६५] (अश्नः अधरात् सप्त वीरासः उत् आयन्) प्रजाप्रतिके नाभि-शरीरसे विश्वामित्र आदि सात ऋषि उत्पन्न हुए; और (अष्ट उत्तरात् तात् सं अजग्मिरन्) उसके उत्तरी शरीरसे बालखिल्य आदि आठ उत्पन्न हुए । (पश्चातात् स्थिविमन्तः नव आयन्) पीछेसे भृगु आदि नौ उत्पन्न हुए; (प्राक् दश) अङ्गिरा आदि दस आगेसे उत्पन्न हुए; (अश्नः सानु वि तिरन्ति) ये यज्ञांशका भक्षण करनेवाले द्युलोकके उन्नत प्रदेशकी अभिवृद्धि करते हैं ॥ १५ ॥

[२६६] (दशानां एकं समानं कपिलं) दस अंगिरसोंमें एक सबके प्रति समान भाव रखनेवाला कपिल है; (तं पार्याय क्रतवे हिन्वन्ति) उसको श्रेष्ठ स्थान प्राप्त करानेवाले आवश्यक यज्ञादि कर्म साधनाके लिये प्रेरित करते हैं । (माता अवेनन्तं वक्षणासु सुधितं गर्भं तुषयन्ती बिभर्ति) जगत् निर्मात्री प्रकृतिमाताने कामना न करनेवाले उस गर्भको संतुष्ट होकर जलमें धारण किया ॥ १६ ॥

[२६७] (पीराः पीवानं मेषं अपचन्त) प्रजापतिके वीर पुत्रोंने बलवान् मेषको पाया; (नि-उप्ताः अक्षाः अनु दीषे आसन्) क्रीडास्थानमें पाश इच्छानुसार सुखके लिये फेंके गये । (अप्सु अन्नः द्वा पविवन्ता पुनन्ता अन्तः चरन्ति) इनमेंसे दो प्रचण्ड धनु लेकर मन्त्रोच्चारणके द्वारा, अपने शरीरको शुद्ध करते करते जलमें विचरण करते हैं ॥ १७ ॥

[२६८] (क्रोशनासः) विविध रीतिसे आवाहन करनेवाले (विष्वञ्चः) अनेक प्रकारके आङ्गिरस (वि आयन्) यहां आये हैं । (नेमः पचाति) उनमें आधे लोग हविका पाक करते हैं और (अर्धः नहि पक्षत्) आधे पकाते नहीं । (अयं देवः सविता) इन बातोंको सविता देवने (मे तत् आह) मुझसे कहा है । वास्तविक (द्रवन्नः इत) काष्ठको अन्नवत् खानेवाला और (सर्पिः अन्नः) घृतको भक्षण करनेवाला अग्नि भी प्रजापतिकी उपासना करता है ॥ १८ ॥

[२६९] (अचक्रया स्वधया) चक्रहीन सेनाके साथ रहनेवाले और (आरात्) दूरसे (ग्रामं वहमानः) भूत संघको धारण करने वाले प्रजापतिको (अदश्यम्) मैं देख रहा हूं । वह (सद्यः नवीयान् अर्यः) सदा ताजा- उत्साही रहनेवाला स्वामी (शिश्ना प्रमिनानः) तुरंत शत्रुओंका संहार करनेवाला है; (जनानां युगा प्र सिषक्तिः) वह लोगोंके जोडोंको मिलाता है ॥ १२ ॥

एतौ मे गावौं प्रमरस्य युक्तौ मो षु प्र सेंधीर्मुहुरिन्ममन्धि ।
आपश्चिदस्य वि नशन्त्यर्थं सूरश्च मर्क उपरो बभूवान् २० [१८]

अयं यो वज्रः पुरुधा विवृत्तो ऽवः सूर्यस्य बृहतः पुरीषात् ।
श्रव इदेना परो अन्यदस्ति तदव्यथी जरिमाणस्तरन्ति २१

वृक्षेवृक्षे नियता मीमयद्गौ-स्ततो वयः प्र पतान् पूरुषादः ।
अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत् २२ (२७२)

देवानां माने प्रथमा अतिष्ठन् कृन्तत्रादेषामुपरा उदायन् ।
त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् २३

सा ते जीवातुरुत तस्य विद्धि मा स्मैतादृगप गूहः समर्ये ।
आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते २४ [१९] (२७४)

---

[२७०] (मे प्रमरस्य) शत्रुमारक मेरे (एतौ गावौ युक्तौ) ये दो योजित हुए गमनशील वृषभ समान घोडे (मो सु प्रसेधीः) तू यहांसे कभी दूर न कर। परन्तु (मुहुः इत् ममन्धि) तू इन्हें बार-बार सान्त्वना दे। (अस्य अर्थं आपः चित् विनशन्ति) इनके गतिको पानीही रोकता है, नष्ट करता है; (सूरः च मर्कः) वह सूर्यके समान और जगत्का शोधक (उपरः बभूवान्) मेघके समान पदार्थोंका दाता है ॥ २० ॥

[२७१] (अयं यः वज्रः) यह जो वज्र दुःखोंको निवारण करनेवाला (पुरुधा विवृत्तः) धारण करनेमें समर्थ, विविध प्रकारसे रह रहा है, वह (सूर्यस्य बृहतः पुरीषात् अवः) सूर्यके समान सर्वसंचालक महान् स्वामीके वैभवसे हमें प्राप्त होता है। (एना परः अन्यत् श्रवः इत् अस्ति) इसके अनन्तर और भी स्थान है; (तत् अव्यथी जरिमाणः तरन्ति) वह अनायास उस स्थानका पार पा जाते हैं ॥ २१ ॥

[२७२] (वृक्षे वृक्षे नियता गौः मीमयत्) प्रत्येक धनुषमें बंधी प्रत्यञ्चा शब्द करती है; (तत् पुरुषादः वयः प्रपतान्) उससे शत्रुओंको भक्षण करनेवाले बाण निकलते हैं। (अथ इदं विश्वं भुवनं भयात) इससे यह सारा संसार डरता है; और (इन्द्राय सुन्वत्) सब लोग इन्द्रकी पूजा करते हैं और (ऋषये च शिक्षत्) सर्वद्रष्टा ऋषि उसकी शिक्षा प्राप्त करते हैं ॥ २२ ॥

[२७३] (देवानां माने प्रथमाः अतिष्ठन्) देवोंके निर्माण कालमें प्रथम मेघ उत्पन्न हुए; (एषां कृन्तत्रात् उपराः उदायन्) मेघके छेदन-भेदन होनेसे जलकी उत्पत्ति हुई। (त्रयः अनूपाः पृथिवीं तपन्ति) तीन गुणोंको उत्पन्न करनेवाले- पर्जन्य, वायु और सूर्य- ये तीन अनुकूल होकर भूमिको तप्त करते हैं; और (द्वा बृबूकं पुरीषं वहतः) इनमेंसे दो- वायु और सूर्य- प्रीतिकर जलका वहन करते हैं ॥ २३ ॥

[२७४] (ते सा जीवातुः) सूर्य ही तुम्हारा जीवनाधार है; (उत तस्य विद्धि) और तूही इस स्वरूपको जानता है; (समर्ये एतादृग् मा अपगूहः स्म) यज्ञके समय ऐसे प्राणदायक स्वरूपको मत छिपा- उस प्रभावका वर्णन-स्तवन कर। (स्वः आविः कृणुते) वह सूर्य त्रिलोकको प्रकाशित करता है; (बुसं गूहते) वह सूर्य जलको बाष्परूपसे शोषण करता है; (अस्य निर्णिजः सः पादुः न मुच्यते) इस गमन तत्त्वका वह चेतनामय स्वरूप सूर्य कभी त्याग नहीं करता ॥ २४ ॥

(२८)

(१२) १ इन्द्रस्नुषा वसुक्रपत्नी ऋषिका; २,३,८,१०,१२ इन्द्र ऋषिः; ३,४,५,७,९,११ ऐन्द्रो वसुक्र ऋषिः। २,६,८,१०,१२ ऐन्द्रो वसुक्रो देवता; १,३,४,५,७,९,११ इन्द्रो देवता। त्रिष्टुप्।

विश्वो ह्य१न्यो अरिराजगाम ममेदह श्वशुरो ना जगाम ।
जक्षीयाद्धाना उत सोमं पपीयात् स्वाशितः पुनरस्तं जगायात् ॥ १

स रोरुवद्वृषभस्तिग्मशृङ्गो वर्ष्मन् तस्थौ वरिमन्ना पृथिव्याः ।
विश्वेष्वेनं वृजनेषु पामि यो मे कुक्षी सुतसोमः पृणाति ॥ २

अद्रिणा ते मन्दिन इन्द्र तूयान् त्सुन्वन्ति सोमान् पिबसि त्वमेषाम् ।
पचन्ति ते वृषभाँ अत्सि तेषां पृक्षेण यन्मघवन् हूयमानः ॥ ३

इदं सु मे जरितरा चिकिद्धि प्रतीपं शापं नद्यो वहन्ति ।
लोपाशः सिंहं प्रत्यञ्चमत्साः क्रोष्टा वराहं निरतक्त कक्षात् ॥ ४

कथा त एतदहमा चिकेतं गृत्सस्य पाकस्तवसो मनीषाम् ।
त्वं नो विद्वाँ ऋतुथा वि वोचो यमर्धं ते मघवन् क्षेम्या धूः ॥ ५

---

[२८]

[२७५] [इन्द्रके पुत्र वसुक्रकी पत्नी कहती है—] (अन्यः हि विश्वः अरिः आजगाम) इन्द्रके अतिरिक्त समस्त देवता यहां आये हैं, (अह मम इत् श्वसुरः न आजगाम) और केवल मेरे श्वसुर इन्द्र नहीं आये । यदि वह आते तो (धानाः जक्षीयात्) भुना हुआ जौ खाते, (उत सोमं पपीयात्) और सोम पीते; (स्वाशितः पुनः अस्तं जगायात्) आहारादिसे तृप्त होकर पुनः अपने घर लौट जाते ॥ १ ॥

[२७६] [इन्द्र कहता है-] (सः वृषभः तिग्मशृङ्गः) वह कामनाओंको पूर्ण करनेवाला तेजस्वी मैं (पृथिव्याः वरिमन् वर्ष्मन् आ तस्थौ) पृथिवीके विस्तीर्ण और उन्नत प्रदेशमें रहता हूं । (सुतसोमः यः मे कुक्षी पृणाति) सोम निचोडनेवाला जो मुझे भरपेट सोम पीनेको देता है, मैं (एनं विश्वेषु वृजनेषु पामि) उसकी समस्त संग्रामोंमें रक्षा करता हूं ॥ २ ॥

[२७७] हे (इन्द्र) इन्द्र ! (ते मन्दिनः अद्रिणा तूयान् सोमान् सुन्वन्ति) तेरे लिये मदयुक्त, प्रस्तर फलकोंपर शीघ्रतासे निचोडा सोम जब लोग तैयार करते हैं, तब (त्वं एषां पिबसि) तू उनके सोमका पान करता है। हे (मघवन्) धनवान् इन्द्र ! (हूयमानः) जिस समय आदरपूर्वक हविर्द्रव्योंसे हवन किया जाता है, उस समय (ते वृषभाँ पचन्ति तेषां पृक्षेण अत्सि) तेरे लिये वे पशु पकाते हैं, और तू उनका स्नेहसे भक्षण करता है ॥ ३ ॥

[२७८] हे (जरितः) शत्रुओंके नाशक इन्द्र ! (इदं मे सु आ चिकित् हि) तेरी कृपासे यह मुझमें जो सामर्थ्य है, उसे जान कि (नद्यः प्रतीपं शापं वहन्ति) नदियां विपरीत दिशाको जल बहाने लगती हैं, (लोपाशः प्रत्यञ्चं सिंहं अत्साः) तृण खानेवाला हरिण आगे आते सिंहको पराङ्मुख करके उसके पीछे दौडता है, और (क्रोष्टा वराहं कक्षात् निरतक्त) शृगाल वराहको गहन अरण्यसे भगा देता है ॥ ४ ॥

[११०४] हे इन्द्र ! (हर्यमाणः महित्वा रोदसी आ) कामायमान तू अपनी महिमासे द्यावापृथिवीको व्याप्त करता है । और (नव्यंनव्यं प्रियं मन्म नु हर्यसि) नित्य नये और प्रिय मननीय स्तोत्रकी तू इच्छा करता है । हे (असुर) बलवान इन्द्र ! (गोः हर्यतं पस्त्यं हरये सूर्याय प्र आविष्कृधि) उदक-जलका रमणीय गृह-मेघको और प्रेरक सूर्यको प्रकट कर ॥ ११ ॥

आ त्वा हर्यन्तं प्रयुजो जनानां रथे वहन्तु हरिशिप्रमिन्द्र ।
पिबा यथा प्रतिभृतस्य मध्वो हर्यन् यज्ञं सधमादे दशोणिम् १२

अपाः पूर्वेषां हरिवः सुताना मथो इदं सवनं केवलं ते ।
ममद्धि सोमं मधुमन्तमिन्द्र सत्रा वृषञ्जठर आ वृषस्व १३ [७] (११०६)

(९७)

२३ आथर्वणो भिषग् । ओषधयः । अनुष्टुप् ।

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनै नु बभ्रूणामहं शतं धामानि सप्त च १

शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्वो यूय मिमं मे अगदं कृत २

ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।
अश्वा इव सजित्वरी र्वीरुधः पारयिष्ण्वः ३

[११०५] हे (इन्द्र) इन्द्र ! (हरिशिप्रं त्वा हर्यन्तं रथे प्रयुजः) सोमपान करके हरितवर्ण मुख और रमणीय तुझे रथपर बिठाकर रथमें जोते तुम्हारे घोडे (जनानां आ वहन्तु) मनुष्योंके यज्ञमें ले आवें। (यथा प्रतिभृतस्य मध्वः यज्ञं दशोणिम्) जिससे तेरे लिये प्रेमपूर्वक प्रस्तुत किया हुआ मधुर, यज्ञसाधन और दस अंगुलियोंसे अभिषुत सोम (हर्यन् पिब सधमादे) सोमपानकी इच्छा करनेवाला तू पीकर युद्धमें विजय प्राप्त करोगे ॥ १२ ॥

[११०६] हे इन्द्र ! (पूर्वेषां सुतानां अपाः) पहले प्रातःसवनमें जो सोम प्रस्तुत हुआ है, उसका तुमने पान किया है। हे (हरिवः) जगत्‌के स्वामिन् ! (अथो इदं सवनं केवलं ते) और इस समय माध्यन्दिन सवनमें जो सोम प्रस्तुत हुआ है, वह केवल तुम्हारे लिये ही है। (मधुमन्तं सोमं ममद्धि) इस मधुर सोमका आस्वादन करो। हे (सत्रावृषन् इन्द्र) बहुत वर्षा करनेवाले इन्द्र ! (जठरे आ वृषस्व) तू अपने उदरमें सोमरसको सेचित कर ॥१३॥

[९७]

[११०७] (पूर्वाः याः ओषधीः देवेभ्यः पुरा त्रियुगं जाताः) अनेक रूप पोषण समर्थ रस आदिसे पूर्ण जो ओषधियां देवोंने पूर्व समयमें तीन युगोमें– सत्य, त्रेता और द्वापर वा वसन्त, वर्षा और शरद्– बनायी हैं, (बभ्रूणां शतं सप्त च धामानि नु अहं मनै) वह सब पिङ्गलवर्ण ओषधियां एक सौ सात स्थानोंमें निश्चित रूपसे विद्यमान हैं, ऐसा मैं जानता हूं ॥ १ ॥

[११०८] हे (अम्ब) मातृरूप ओषधियो ! (वः शतं धामानि) तुम्हारे सैकडों जन्म–स्थान हैं (उत वः सहस्रं रुहः) और तुम्हारे सहस्रों अंकुर–पोधे हैं। (अध यूयं शतक्रत्वः) और तुम सब अनेक कर्म सामर्थ्योंसे युक्त हो। (मे इमं अगदं कृत) तुम मुझे आरोग्य प्रदान करो ॥ २ ॥

[११०९] हे (ओषधीः) ओषधियो ! तुम (पुष्पवतीः प्रसूवरीः प्रति मोदध्वम्) फूला और उत्तम फलोंवाली होकर रोगीके प्रति प्रसन्न होओ। तुम (अश्वाः इव सजित्वरीः) घोडोंके समानही रोगरूप शत्रुपर विजय करनेवाली हो। और (वीरुधः पारयिष्ण्वः) रोग–पीडाओंको रोकनेवाली और रोगीको कष्टसे पार करनेवाली हो ॥ ३ ॥

ओषधीरिति मातर—स्तद्वो देवीरुप ब्रुवे ।
सनेयमश्वं गां वास आत्मानं तव पूरुष ४
अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
गोभाज इत् किलासथ यत् सनवथ पूरुषम् ५ [८]

यत्रौषधाः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग् रक्षोहामीवचातनः ६ (१११२)
अश्वावतीं सोमावती—मूर्जयन्तीमुदोजसम् । आविंत्सि सर्वा ओषधी—रस्मा अरिष्टतातये ७
उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते । धनं सनिष्यन्तीना—मात्मानं तव पूरुष ८
इष्कृतिर्नाम वो माता ऽथो यूयं स्थ निष्कृतीः ।
सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ९
अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः । ओषधीः प्राचुच्यवु—र्यत् किं च तन्वो३ रपः १०[९]

[१११०] हे (देवीः ओषधीः) दिव्य गुणोंसे युक्त ओषधियो ! तुम (मातरः) माताके समान हितकारिणी हो । (वः तत् इति उप ब्रुवे) मैं तुमको यह कहता हूं; हे (पुरुष) चिकित्सक मनुष्य ! मैं ओषधियोंको प्राप्त करनेके लिये (अश्वं गां वासः आत्मानं तव सनेयम्) घोडा, गौ, वस्त्र और अपने आपको भी तेरे लिये देता हूं ॥४॥

[११११] हे ओषधियो ! (वः अश्वत्थे निषदनम्) तुम्हारा अश्वत्थ वृक्षपर निवासस्थान है। (वः पर्णे वसतिः कृता) तुम पलाशवृक्षपर वास करती हैं। (गोभाजः इत् किल असथ) तुम गायोंका पोषण करती हो। (यत् पुरुषं सनवथ) जिस समय तुम मनुष्योंका संवर्धन करती हो ॥ ५ ॥

[१११२] जैसे (राजानः समितौ इव) राजा लोग संग्राममें एकत्र होते हैं, उसी प्रकार (यत्र ओषधीः सं अग्मत) अनेक ओषधियां एकत्र होती हैं। (सः विप्रः भिषक् उच्यते) वह विद्वान् पुरुष चिकित्सक कहाता है, वह (रक्षो हा अमीवचातनः) पीडाओंका नाशक और रोगोंका विनाश कर्ता है ॥ ६ ॥

[१११३] (अश्वावतीं सोमावतीं ऊर्जयन्तीं उदोजसं) अश्वावती, सोमावती, ऊर्जयन्ती और उदोजस और (सर्वाः ओषधीः अस्मै अरिष्टतातये आवित्सि) अन्य सब ओषधियोंको इसे नीरोग करनेके लिये मैं जानता हूं ॥ ७ ॥

[१११४] (गावः गोष्ठात् इव ओषधीनां शुष्माः उत् ईरते) गोशालासे जैसे गायें बाहर होती हैं, वैसेही ओषधियोंसे अनेक प्रकारके बल स्वयं उत्पन्न होते हैं। हे (पूरुष) पुरुष ! (तव आत्मानं सनिष्यन्तीनां धनम्) तेरे शरीरकी सेवा करनेवाली ये ओषधियां तुझे स्वास्थ्य रूप धन देंगी ॥ ८ ॥

[१११५] हे ओषधियो ! (वः माता इष्कृतिः नाम) तुम्हारी माताका नाम इष्कृति-नीरोग करनेवाली है। (अथ यूयं निष्कृतीः स्थ) इसलिये तुम भी रोगोंको दूर करनेवाली हो। तुम (सीराः पतत्रिणीः स्थन) शीघ्र गमनशील और पतनशील होओ, जिससे (यत् आमयति निष्कृथ) जो व्याधिसे पीडित है, उसे नीरोग करो ॥ ९ ॥

[१११६] (स्तेनः इव व्रजम् विश्वाः परिष्ठाः ओषधीः अति अक्रमुः) जैसे चोर गोष्ठपर आक्रमण करता है, वैसेही समस्त व्यापी और सर्वत्र ओषधियां रोगोंपर आक्रमण करती हैं। (यत् किं च तन्वः रपः प्र अचुच्यवुः) जो कुछ शरीरका पीडाकारक रोगका कारण है, उसको ओषधियां दूर करती हैं ॥ १० ॥

यदिमा वाजयन्नह— मोषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ११
यस्यौषधीः प्रसर्पथा— ङ्गमङ्गं परुष्परुः । ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव १२
साकं यक्ष्म प्र पत चाषेण किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया १३
अन्या वो अन्यामव— त्वन्यान्यस्या उपावत ।
ताः सर्वाः संविदाना इदं मे प्रावता वचः १४
याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः
बृहस्पतिप्रसूता— स्ता नो मुञ्चन्त्वंहसः १५ [१०]

मुञ्चन्तु मा शपथ्या३— दथो वरुण्यादुत ।
अथो यमस्य पड्बीशात् सर्वस्माद्देवकिल्बिषात् १६
अवपतन्तीरवदन् दिव ओषधयस्परि । यं जीवमश्नवामहै न स रिष्याति पूरुषः । १७

[१११७] (यत् वाजयन् अहं इमाः ओषधीः हस्ते आदधे) जब बल देनेवाला मैं इन ओषधियोंको हाथमें लेता हूं, तब (यथा जीवगृभः पुरा यक्ष्मस्य आत्मा नश्यति) जिस प्रकार व्याधसे भयभीत होकर प्राणी भागते हैं; उसी प्रकार रोगका मूल अंश भी पूर्ववत् नष्ट हो जाता है ॥ ११ ॥

[१११८] हे (ओषधीः) ओषधियो ! (यस्य अङ्गं अङ्गं परुः परुः प्रसर्पथ) जिस रोगी मनुष्यके अंग–प्रत्यंग और ग्रंथि–ग्रंथिमें व्याप्त हो जाती हैं, (उग्रः मध्यमशीः ततः यक्ष्मं वि बाधध्वे) बलवान मध्यस्थ व्यक्तिके समान, उसके शरीरमेंसे रोगको दूर कर देती हों ॥ १२ ॥

[१११९] हे (यक्ष्म) रोग ! (चाषेण किकिदीविना साकं प्र पत) तू चाष और किकिदीवि पक्षी जैसे अत्यंत वेगसे उड जाते हैं, वैसेही शीघ्र दूर होओ। (वातस्य ध्राज्या साकं निहाकया साकं नश्य) और वायुके वेगके साथ और गोहके समान तू नष्ट हो ॥ १३ ॥

[११२०] हे ओषधियो ! (वः अन्या अन्याम् अवतु) तुममेंसे एक ओषधि दूसरीके पास जाय और (अन्या-न्यस्याः उप अवत) दूसरी तिसरीके समीप जाय । इस प्रकार (ताः सर्वाः संविदानाः) जगत्‌की वे सारी ओषधियां एकमत होकर, (मे इदं वचः प्रावत) मेरे इस वचनकी–प्रार्थनाकी रक्षा करें ॥ १४ ॥

[११२१] (याः फलिनीः याः अफलाः) जो फलवाली हैं, जो फलसे रहित हैं, (याः अपुष्पा च पुष्पिणीः) जो फूलसे रहित और फूलवाली हैं; (ताः बृहस्पतिप्रसूताः नः अंहसः मुञ्चन्तु) वे सब बृहस्पतिके द्वारा उत्पादित होकर हमें पापसे–रोगसे मुक्त करें ॥ १५ ॥

[११२२] (मा शपथ्यात् पनसः मुञ्चन्तु) ओषधियां मुझे शपथसे उत्पन्न पापसे बचावें। (अथो वरुण्यात् उत अथो यमस्य पड्वीशात् सर्वस्मात् देवकिल्बिशात्) और वरुणके पाश, यमकी बेडीसे और देव सम्बन्धि सब प्रकारके पापसे भी वे ओषधियां मुझे मुक्त करें ॥ १६ ॥

[११२३] (दिवः परि अवपतन्तीः ओषधयः अवदन्) द्युलोकसे नीचे आती हुई ओषधियोंने कहा था कि (यं जीवं अश्नवामहै न सः पूरुषः रिष्याति) हम जिस जीवपर अनुग्रह करती हैं, उस पुरुषका शरीर रोगोंसे पीडित नहीं होता ॥ १७ ॥

या ओषधीः सोमराज्ञी॒र्बह्वीः श॒तवि॑चक्षणाः । तासां॒ त्वम॑स्युत्त॒मा॒रं॑ कामा॑य॒ शं हृ॒दे १८
या ओष॑धीः॒ सोम॑राज्ञी॒र्विष्ठि॑ताः पृथि॒वीमनु॑ । बृह॒स्पति॑प्रसूता अ॒स्यै सं द॑त्त वी॒र्य॑म् १९
मा वो॑ रिषत् ख॒नि॒ता यस्मै॑ चा॒हं खना॑मि वः । द्वि॒पच्चतु॑ष्पद॒स्माकं॒ सर्व॑मस्त्वनातु॒रम् २०
याश्चे॒दमु॑पशृ॒ण्वन्ति॒ याश्च॑ दू॒रं परा॑गताः । सर्वाः॑ सं॒गत्य॑ वीरुधो॒ऽस्यै सं द॑त्त वी॒र्य॑म् २१
ओष॑धयः॒ सं व॑दन्ते॒ सोमे॑न स॒ह राज्ञा॑ । यस्मै॑ कृ॒णोति॑ ब्राह्म॒ण॒स्तं रा॑जन् पारयामसि २२
त्वमु॑त्त॒मास्यो॑षधे॒ तव॑ वृ॒क्षा उप॑स्तयः ।
उप॑स्तिरस्तु॒ सो॒३॒ऽस्माकं॒ यो अ॒स्माँ अ॑भि॒दास॑ति २३[११](११२९)

(९८)

१२ आर्ष्टिषेणो देवापिः (वृष्टिकामः) । देवाः । त्रिष्टुप् ।

बृह॑स्पते॒ प्रति॑ मे दे॒वता॑मिहि मि॒त्रो वा॒ यद्वरु॑णो॒ वासि॑ पू॒षा ।
आ॒दि॒त्यैर्वा॒ यद्वसु॑भिर्म॒रुत्वा॒न्त्स प॒र्जन्यं॒ शंत॑नवे वृषाय १ (११३०)

[११२४] (याः ओषधीः सोमराज्ञीः) जिन ओषधियोंका राजा सोम है और (बह्वीः शतविचक्षणाः) असंख्य तथा सैकडों गुणोंसे युक्त हैं, (तासां त्वं उत्तमा असि) उनमें, हे सोम, तू उत्तम–श्रेष्ठ हो । इसलिये (कामाय अरं हृदे शम्) तुम मेरे अभिलषितको प्राप्त करानेमें और हृदयको सुखी करनेमें समर्थ हों ॥ १८ ॥

[११२५] (याः सोमराज्ञीः ओषधयः पृथिवीं अनुविष्ठिताः) जो ओषधियां जिनमें सोम ओषधि मुख्य हैं, और जो पृथिवीके अनेक स्थानोंमें अधिष्ठित हैं, वे ही (बृहस्पति प्रसूताः अस्यै वीर्यं सं दत्त) बृहस्पति द्वारा उत्पादित ओषधियां इस रोगीको बल प्रदान करें ॥ १९ ॥

[११२६] हे ओषधियो ! (वः खनिता मा रिषत्) तुमको खोदकर निकालनेवाला स्वयं नष्ट न हो । (यस्मै च अहं नः खनामि) जिसके आरोग्यके लिये मैं तुमको खोदता हूं, वह भी नष्ट नहीं हो । (अस्माकं द्विपत् चतुष्पत् सर्वं अनातुरं अस्तु) हमारे–दोपाये और चौपाये– पुत्र और पशु आदि सब प्राणी रोगसे रहित हों ॥ २० ॥

[११२७] (याः च इदं उपशृण्वन्ति) जो ओषधियां यह स्तोत्र सुनती हैं और (याः च दूरं परागताः) जो अत्यन्त दूरपर हैं, (सर्वाः वीरुधः संगत्य) वे सब ओषधियां मिलकर (अस्यै वीर्यं सं दत्त) इस रोग-युक्त शरीरको बल–सामर्थ्य देवें ॥ २१ ॥

[११२८] (ओषधयः सोमेन राज्ञा सह सं वदन्ते) ओषधियां राजा सोमके साथ यह बोलती हैं कि (यस्मै ब्राह्मणः कृणोति) जिसके लिये ओषधितज्ञ वैद्य चिकित्सा करता है, हे (राजन्) राजन् ! (तं पारयामसि) उसको हम संकटसे पार कर देती हैं ॥ २२ ॥

[११२९] हे (ओषधे) ओषधि ! (त्वं उत्तमा असि) तू ओषधियोंमें श्रेष्ठ है । (वृक्षाः तव उपस्तयः) सब अन्य वृक्ष तेरेसे कनिष्ठ हैं । (यः अस्मान् अभिदासति) जो हमारा नाश करता है, (सः अस्माकं उपस्तिः अस्तु) वह हमारे वश होकर रहे ॥ २३ ॥

[९८]

[११३०] हे (बृहस्पते) बृहस्पति ! (मे देवतां प्रति इहि) तू मेरे लिये वर्षा करनेवाले देवताके पास जाओ । तू (मित्रः वा असि, वरुणः यत् वा पूषा) मित्र, वरुण, पूषा (आदित्यैः वा यत् वा वसुभिः मरुत्वान्) अथवा आदित्यों और वसुओंके साथ इन्द्रही हो । (सः पर्जन्यं शंतनवे वृषाय) वह तू मेघसे शन्तन राजाके लिये जल बरसाओ ॥ १ ॥

आ दे॒वो दू॒तो अ॑जि॒रश्चि॑कि॒त्वान् त्वद्दे॑वापे अ॒भि माम॑गच्छत् ।
प्र॒ती॒ची॒नः प्रति॒ मामा व॑वृत्स्व॒ दधा॑मि ते द्यु॒मतीं॒ वाच॑मा॒सन् २
अ॒स्मे धे॑हि द्यु॒मतीं॒ वाच॑मा॒सन् बृह॑स्पते अनमी॒वामि॑षि॒राम् ।
यया॑ वृ॒ष्टिं शंत॑नवे॒ वना॑व दि॒वो द्र॒प्सो मधु॑माँ आ वि॑वेश ३
आ नो॑ द्र॒प्सा मधु॑मन्तो विश॒न्त्विन्द्र॑ दे॒ह्यधि॑रथं स॒हस्र॑म् ।
नि षी॑द हो॒त्रमृ॑तु॒था य॑जस्व दे॒वान् दे॑वापे ह॒विषा॑ सपर्य ४
आर्ष्टि॑षे॒णो हो॒त्रमृषि॑र्नि॒षीद॑न् दे॒वापि॑र्देवसुम॒तिं चि॑कि॒त्वान् ।
स उत्त॑रस्मा॒दध॑रं समु॒द्रम॒पो दि॒व्या अ॑सृजद्व॒र्ष्या॑ अ॒भि ५
अ॒स्मिन् त्स॑मु॒द्रे अध्युत्त॑रस्मि॒न्नापो॑ दे॒वेभि॒र्निवृ॑ता अतिष्ठन् ।
ता अ॑द्रवन्नार्ष्टि॑षे॒णेन॑ सृ॒ष्टा दे॒वापि॑ना॒ प्रेषि॑ता मृ॒क्षिणी॑षु ६ [१२]

[११३१] हे (देवापे) देवापि ! (त्वत् देवः अजिरः चिकित्वान् दूतः) तेरे पाससे कोई एक तेजस्वी देव जो वेगशाली और ज्ञानवान् है, वह दूत होकर (मां अभि अगच्छत्) मेरे पास आवे। हे बृहस्पति ! (प्रतीचीनः मां प्रति आ ववृत्स्व) सब विषयोंसे विमुख होकर मेरे प्रतिही लौट आओ। (ते आसन् द्युमतीं वाचं दधामि) तेरे लिये में अर्थपूर्ण तेजस्वी स्तोत्र प्रदान करता हूं ॥ २ ॥

[११३२] हे (बृहस्पते) बृहस्पति ! (अस्मे आसन् द्युमतीं वाचं धेहि) हमारे मुखमें एक तेजस्वी स्तोत्र युक्त वाणीका प्रदान कर, जो (अनमीवां इषिरां) निर्दोष और ओज युक्त हो। (यया शंतनवे वृष्टिं वनाव) जिससे हम दोनों शंतनुके लिये वृष्टि उपस्थित करें। (दिवः मधुमान् द्रप्सः आ विवेश) आकाशसे मधुर रस-वृष्टि प्रविष्ट होवे ॥ ३ ॥

[११३३] (नः मधुमन्तः द्रप्साः आ विशन्तु) हमें मधुर रस-वृष्टि प्राप्त हो। हे (इन्द्र) इन्द्र ! (अधिरथं सहस्रं देहि) रथके ऊपर रखा हुआ सहस्रों प्रकारका धन हमे दो। हे (देवापे) देवापि ! (होत्रं नि षीद) तू इस यज्ञकार्यमें आकर बैठ। (ऋतुथा देवान् यजस्व हविषा सपर्य) समय समयपर देवोंका पूजन कर और हवि देकर उनको संतुष्ट कर ॥ ४ ॥

[११३४] (देवसुमतिं चिकित्वान् आर्ष्टिषेणः देवापिः ऋषिः) देवोंकी उत्तम स्तुतिको जाननेवाला आर्ष्टिषेण देवापि ऋषि (होत्रं निषीदन्) हवन कर्म करनेके लिये बैठा है। (सः उत्तरस्मात् अधरं समुद्रम्) वह ऊपरके समुद्रसे- अन्तरिक्षसे नीचेके पार्थिव समुद्रमें (दिव्याः वर्ष्याः अपः अभि असृजत्) दिव्य सुखदायक वृष्टिका जल प्राप्त करावे ॥ ५ ॥

[११३५] (अस्मिन् समुद्रे अधि उत्तरस्मिन् आपः) इस पार्थिव समुद्रपर अन्तरिक्षमें स्थित जलमय प्रदेशको (देवेभिः निवृताः अतिष्ठन्) देवोंने प्रतिबंधित कर रखा है। (ताः आर्ष्टिषेणेन देवापिना सृष्टाः प्रेषिताः) उन जलोको आर्ष्टिषेण देवापिने उत्पन्न करके उसकी इच्छाके अनुरूप (मृक्षिणीषु अद्रवन्) योग्य भूमिपर पर्जन्य रूपसे बरसने लगते हैं ॥ ६ ॥

यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् ।
देवश्रुतं वृष्टिवनिं रराणो बृहस्पतिर्वाचमस्मा अयच्छत् ७
यं त्वा देवापिः शुशुचानो अग्न आर्ष्टिषेणो मनुष्यः समीधे ।
विश्वेभिर्देवैरनुमद्यमानः प्र पर्जन्यमीरया वृष्टिमन्तम् ८
त्वां पूर्व ऋषयो गीर्भिरायन् त्वामध्वरेषु पुरुहूत विश्वे ।
सहस्राण्यधिरथान्यस्मे आ नो यज्ञं रोहिदश्वोप याहि ९
एतान्यग्ने नवतिर्नव त्वे आहुतान्यधिरथा सहस्रा ।
तेभिर्वर्धस्व तन्वः शूर पूर्वीर्दिवो नो वृष्टिमिषितो रिरीहि १०
एतान्यग्ने नवतिं सहस्रा सं प्र यच्छ वृष्ण इन्द्राय भागम् ।
विद्वान् पथ ऋतुशो देवयानानप्यौलानं दिवि देवेषु धेहि ११
अग्ने बाधस्व वि मृधो वि दुर्गहाऽपामीवामप रक्षांसि सेध ।
अस्मात् समुद्राद्बृहतो दिवो नोऽपां भूमानमुप नः सृजेह १२ [१३] (११४१

[११३६] (यत् देवापिः शंतनवे कृपयन् पुरोहितः होत्राय वृतः) जिस समय देवापि शन्तनुपर कृपा करता हुआ उसका पुरोहित होकर, यज्ञकर्म करनेके लिये उद्यत हुआ, और वह (देवश्रुतं वृष्टिवनिं अदीधेत्) देवप्रसिद्ध तथा सुखप्रद वृष्टिका वर्धक बृहस्पतिका स्तवन–ध्यान करने लगा, उस समय (रराणः बृहस्पतिः अस्मै वाचं अयच्छत्) प्रसन्न होकर बृहस्पतिने उसे आश्वासित किया ॥ ७ ॥

[११३७] हे (अग्ने) अग्नि ! (यं त्वा आर्ष्टिषेणः देवापिः मनुष्यः शुशुचानः समीधे) जिस तुझे आर्ष्टिषेण देवापि नामक मनुष्यने शुद्ध पवित्र होकर स्तुति–स्तोत्रसे उत्तमरीतिसे प्रज्वलित किया है, वह तू (विश्वेभिः देवैः अनुमद्यमानः) समस्त देवोंका सहयोग पाकर (वृष्टिमन्तं पर्जन्यं प्र ईरय) वृष्टिवर्धक मेघको प्रेरित कर ॥ ८ ॥

[११३८] हे अग्नि ! (पूर्वे ऋषयः गीर्भिः त्वां आयन्) पूर्वके ऋषिलोग स्तुति स्तोत्रोंसे तेरे पास आये थे। हे (पुरुहूत) बहुतोंके द्वारा पुकारजानेवाले अग्नि ! (विश्वे अध्वरेषु) सब यजमान अभी भी यज्ञोंमें स्तुतियों द्वारा तेरी उपासना करते हैं। (अस्मे सहस्राणि अधिरथानि) हमें रथोंसे युक्त सहस्रों ऐश्वर्य सुख प्राप्त हों। हे (रोहिदश्व) लाल देदीप्त रथमें आरोहित अग्नि ! (नः यज्ञं उप याहि) हमारे यज्ञमें पधारो ॥ ९ ॥

[११३९] हे (अग्ने) अग्नि ! (नवतिः नव एतानि अधिरथा सहस्रा त्वे आहुतानि) नब्बे और नौ गायें और रथोंके साथ हजारों पदार्थ तेरे लिये आहुति रूपमें समर्पित हैं। हे (शूर) वीर ! (तेभिः पूर्वीः तन्वः वर्धस्व) उनसे तू अपने अनेक रूपोंको बढा, प्रकट कर। (नः इषितः दिवः वृष्टिं रिरीहि) हमसे प्रार्थित होकर द्युलोकसे हमारे लिये वृष्टि कर ॥ १० ॥

[११४०] हे (अग्ने) अग्नि ! (एतानि नवतिं सहस्रा वृष्णे इन्द्राय भागं सं प्र यच्छ) ये नब्बे हजार गायोको जल-वर्षा करनेवाले इन्द्रको प्रसन्न करनेके लिये उसके भागरूपसे प्रदान कर। और (देवयानान् पथः विद्वान् ऋतुशः) देवयान मार्गोंको जाननेवाला तू समय समयपर (औलानं अपि दिवि देवेषु धेहि) यज्ञ करनेवाले औलानको शन्तनुको देवोंके बीच स्थापित कर ॥ ११ ॥

[११४१] हे (अग्ने) अग्नि ! (मृधः दुर्गहा वि बाधस्व) शत्रुओंकी दुर्गमपुरियोंको नष्ट कर। (अमीवां अप सेध) रोगको दूर कर। (रक्षांसि अप) राक्षसोंका निवारण कर। (अस्मात् बृहतः समुद्रात् दिवः अपाम् भूमानं इह नः उप सृज) इस महान् अन्तरिक्षरूप समुद्रसे और आकाशसे इस भूलोकपर हमारे लिये असीम जल प्रदान करो ॥ १२ ॥

(९९)

११ वम्रो वैखानसः । इन्द्रः । त्रिष्टुप् ।

कं नश्चित्रमिषण्यसि चिकित्वान् पृथुग्मानं वाश्रं वावृधध्यै ।
कत् तस्य दातु शवसो व्युष्टौ तक्षद्वज्रं वृत्रतुरमपिन्वत् १
स हि द्युता विद्युता वेति साम पृथुं योनिमसुरत्वा ससाद ।
स सनीळेभिः प्रसहानो अस्य भ्रातुर्न ऋते सप्तथस्य मायाः २ (११४३)
स वाजं यातापदुष्पदा यन् त्स्वर्षाता परि षदत् सनिष्यन् ।
अनर्वा यच्छतदुरस्य वेदो घ्नञ्छिश्नदेवाँ अभि वर्पसा भूत् ३
स यह्व्योऽवनीर्गोष्वर्वा ऽऽजुहोति प्रधन्यासु सस्रिः ।
अपादो यत्र युज्यासोऽरथा द्रोण्यश्वास ईरते घृतं वाः ४
स रुद्रेभिरशस्तवार ऋभ्वा हित्वी गयमारेअवद्य आगात् ।
वम्रस्य मन्ये मिथुना विवव्री अन्नमभीत्यारोदयन्मुषायन् ५

---

[९९]

[११४२] हे इन्द्र ! (चिकित्वान् नः चित्रं पृथुग्मानं वाश्रं) ज्ञानी तू हमें अत्यंत पूज्य, सतत वृद्धि होनेवाला, प्रशंसनीय (कं वावृधध्यै इषण्यसि) कल्याणमय धन हमारी उन्नतिके लिये प्रदान करते हो । (तस्य शवसः व्युष्टौ कत् दातु) उस बलवान् इन्द्रका सामर्थ्य बढानेके निमित्त हमें क्या देना होगा ? (वृत्रतुरं वज्रं तक्षत् अपिन्वत्) उसके लिये वृत्रनाशक वज्र बनाया गया है, और फिर वह जगत्‌को जलोंसे सेंचता है ॥ १ ॥

[११४३] (सः हि द्युता विद्युता साम वेति) वह इन्द्र तेजस्वी विद्युत् नामक आयुधसे युक्त होकर यज्ञमें सामगान सुननेके लिये जाता है । (असुरत्वा पृथुं योनिं ससाद) और बलयुक्त होकर वह विस्तीर्ण और फलोत्पादक यज्ञमें विराजता है । (सः सनीळेभिः प्रसहानः) वह विमानमें बैठे मरुतोंके साथ शत्रुको पराभूत करता है । (सप्तथस्य भ्रातुः मायाः ऋते न) आदित्योंके सप्तम भ्राता इन्द्रकी माया इस यज्ञमें संभवित नहीं होती ॥ २ ॥

[११४४] (सः वाजं याता अपदुष्पदा यन्) वह संग्राममें जाते समय दुःखसे रहित सीधे मार्गसे जाता हुआ (सनिष्यन् त्स्वर्षाता परि सदत्) शत्रुओंके धनोंको संपादित करके सर्व लाभ संपन्न युद्धमें आगे बढता है । (अनर्वा शतदुरस्य यत् वेदः वर्पसा अभि भूत्) युद्धमें पराङ्मुख न होनेवाला वह सौ दरवाजोंवाली शत्रुपुरीमें जो धन है, वह बलपूर्वक ले आता है । (शिश्नदेवान् घ्नन्) और इन्द्रिय परायण दुष्टोंको नष्ट करता है ॥ ३ ॥

[११४५] (सः अर्वा सस्रिः प्रधन्यासु गोषु यह्वयः अवनीः आ जुहोति) वह इन्द्र मेघोंकी ओर जाकर और मेघमें भ्रमण करके प्रसरणशील और वेगसे बहनेवाली जलधाराओंको उत्तम धान्य युक्त भूमियोंमें प्रदान करता है । (यत्र अपादः अरथाः द्रोण्यश्वासः युज्यासः वाः घृतम् ईरते) जहां उन भूमियोंमें पादरहित, रथादिसे रहित, वेगवान् नदियां जलोंको घतके समान बहाती हैं ॥ ४ ॥

[११४६] (सः अशस्तवारः ऋभ्वा आरेअवद्यः गयं हित्वी रुद्रेभिः आगात्) वह इन्द्र स्वयंदाता, महान् और अनिन्द्य है और वह स्वस्थानसे रुद्रपुत्र मरुतोंके साथ यहां आवे । (वम्रस्य मिथुना विवव्री मन्ये) मुझ वम्रके माता-पिताका दुःख चला गया; क्योंकि (अन्नं अभीत्य मुषायन् अरोदयत्) मैंने शत्रुओंके धनका हरण कर लिया है और उनको रुलाया है ॥ ५ ॥

स इद्दासं तुवीरवं पतिर्दन् षळक्षं त्रिशीर्षाणं दमन्यत् ।
अस्य त्रितो न्वोजसा वृधानो विपा वराहमयोअग्रया हन् ६ [१४]

स द्रुह्वणे मनुष ऊर्ध्वसान आ साविषदर्शसानाय शरुम् ।
स नृतमो नहुषोऽस्मत् सुजातः पुरोऽभिनदर्हन् दस्युहत्ये ७

सो अभ्रियो न यवस उदन्यन् क्षयाय गातुं विदन्नो अस्मे ।
उप यत् सीददिन्दुं शरीरैः श्येनोऽयोपाष्टिर्हन्ति दस्यून् ८

स व्राधतः शवसानेभिरस्य कुत्साय शुष्णं कृपणे परादात् ।
अयं कविमनयच्छस्यमानमत्कं यो अस्य सनितोत नृणाम् ९

अयं दशस्यन् नर्येभिरस्य दस्मो देवेभिर्वरुणो न मायी ।
अयं कनीन ऋतुपा अवेद्यमिमीतारुं यश्चतुष्पात् १०

[११४७] (सः इत् पतिः) उसही सबोंके स्वामी इन्द्रने (तुवीरवं दासं दन्) बहुत गर्जना करनेवाले दासका दमन किया था; (षड् अक्षं त्रिशीर्षाणं दमन्यत्) उसीने छ आँखोंवाले और तीन शिरोंवाले त्वष्टाके पुत्र विश्वरूपको मारा था; (त्रितः अस्य ओजसा वृधानः) त्रित नामक ऋषिने इन्द्रके तेजसे बढकर (अयोअग्रया विपा वराहं हन्) लोहेके समान तीखे नखोंवाली अंगुलियोंसे वराहका वध किया था ॥ ६ ॥

[११४८] (सः ऊर्ध्वसानः द्रुह्वणे अर्शसानाय शरुं आ साविषत्) वह श्रेष्ठ पुरुष, द्रोही और हिंसाकारी मनुष्यको नष्ट करनेके लिये मारक अस्त्रको प्रदान करता है, अर्थात् स्वयं वज्रका उपयोग करता है। (सः नृतमः सुजातः नहुषः अर्हन् अस्मत् दस्युहत्ये) वह नरश्रेष्ठ, उत्तम कुलोत्पन्न दुष्टोंका दण्डक पूज्य होकर हमारे शत्रुओंके विनाशकारी संग्राममें (पुरः अभिनत्) शत्रुके शरीरों और दुर्गोंको तोडे ॥ ७ ॥

[११४९] (सः अभ्रियः न) वह मेघ समुदायके समान (यवसे उदन्यन्) जौ आदि अन्नकी पुष्टिके लिये जलोंको गिरानेवाला और (नः क्षयाय अस्मे गातुं विदत्) हमें हमारे गृहोंका मार्ग दिखानेवाला है। (यत् इन्दुं शरीरैः उप सीदत्) ऐसा इन्द्र जब स्वयं अपने सारे शरीरोंसे सोमके पास जाता है, तब (श्येनः अयोपाष्टिः दस्यून् हन्ति) वह श्येन पक्षीके समान लोहेके सदृश तीक्ष्ण और दृढ पाद-पृष्ठमें शत्रुओंका वध करता है ॥ ८ ॥

[११५०] (सः व्राधतः शवसानेभिः अस्य) वह इन्द्र अपने बलशाली शस्त्रोंसे महान् शत्रुओंको भगा देता है। (कृपणे कुत्साय शुष्णं परादात्) स्तोत्रसे प्रार्थना करनेवाले अपने भक्त कुत्सके लिये शुष्ण नामक असुरको छेदा था। (अयं शस्यमानं कविं अनयत्) उसने स्तोता, कवि उशनाके विरोधियोंको वशमें किया था। (यः अस्य अत्कं उत नृणां सनिता) जो उशना कवि इन्द्रके व्यापक रूपको तथा ज्ञानको और वृष्टिवर्षक इन्द्रके अनुचर मरुतोंको जानता था ॥ ९ ॥

[११५१] (नर्येभिः अयं दशस्यन् अस्य) मनुष्य हितैषी मरुतोंके साथ रहनेवाला इन्द्र स्तोताओंको धन देता है और सब दुष्टोंका नाश करता है। (देवेभिः दस्मः मायी वरुणः न) वह वरुणके समान अपने तेजसे सुंदर और शक्तिमान् है। (अयं कनीनः ऋतुपाः अवेदि) यह कान्तिमान् और सदा सबोंका संरक्षक रूपमें जाना जाता है। (यः चतुष्पात् अररुं अमिमीत) इसने चार पैरोंवाले शत्रुको मार डाला ॥ १० ॥

अस्य स्तोमेभिरौशिज ऋजिश्वा व्रजं दरयद्वृषभेण पिप्रोः ।
सुत्वा यद्यजतो दीदयद्गीः पुर इयानो अभि वर्पसा भूत् ११

एवा महो असुर वक्षथाय वम्रकः पड्भिरुप सर्पदिन्द्रम् ।
स इयानः करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः १२ [१५] (११५३)

(१००) [नवमोऽनुवाकः ॥९॥ सू० १००-११२]

१२ दुवस्युर्वान्दनः । विश्वे देवाः । जगती, १२ त्रिष्टुप् ।

इन्द्र दृह्य मघवन् त्वावदिद्भुज इह स्तुतः सुतपा बोधि नो वृधे ।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे १

भराय सु भरत भागमृत्वियं प्र वायवे शुचिपे क्रन्ददिष्टये ।
गौरस्य यः पयसः पीतिमानश आ सर्वतातिमदितिं वृणीमहे २ (११५५)

आ नो देवः सविता साविषद्वय ऋजूयते यजमानाय सुन्वते ।
यथा देवान् प्रतिभूषेम पाकवदा सर्वतातिमदितिं वृणीमहे ३

[११५२] (यत् सुत्वा यजतः गीः दीदयत्) जिस समय उपासक औशिजने सोम प्रस्तुत करके यज्ञमें स्तोत्रसे स्तुतिपाठ किया, उस समय (अस्य स्तोमेभिः औशिजः ऋजिश्वा वृषभेण पिप्रोः वज्रं दरयत्) इन्द्रके स्तोत्रोंसे बलसम्पन्न उशिजके पुत्र ऋजिश्वाने वज्रसे पिप्रु नामक असुरके गोष्ठको विदीर्ण किया और (इयानः पुरः वर्पसा अभि भूत्) शत्रुओंके नगरोंपर आक्रमण करके उन्हें विनष्ट किया ॥ ११ ॥

[११५३] हे (असुर) बलवान् इन्द्र ! (एव महः वक्षथाय पड्भिः वम्रकः इन्द्रं उप सर्पेत्) इस प्रकार तुझे बहुत हवि देनेकी इच्छासे पैदल चलकर मैं वम्र तुम्हारे पास आया हूं । (सः इयानः अस्मै स्वस्ति करति) आनेवाले इस वम्रका कल्याण कर और (इषं ऊर्जं सुक्षितिं विश्वं आभाः) अन्न, बल तथा उत्तम गृह आदि सारी वस्तुएं प्रदान कर ॥ १२ ॥

[१००]

[११५४] हे (इन्द्र) इन्द्र ! हे (मघवन्) धनवान् ! (भुजे त्वावत् इत् दृह्य) तू हमारे उपभोगके लिये तेरे समान शक्तिशाली शत्रुओंके सैन्यका वध कर । (इह स्तुतः सुतपाः नः वृधे बोधि) इस यज्ञमें स्तुत हुआ और सोमपान किया हुआ तू हमारी वृद्धिके लिये सदा प्रस्तुत रह । (देवेभिः नः श्रुतं सविता प्रावतु) देवोंके साथ हमारे विख्यात यज्ञकी सविता देव रक्षा करे । (सर्वतातिं अदितिं आ वृणीमहे) सर्वोत्पादक अदितिकी हम प्रार्थना करते हैं ॥ १ ॥

[११५५] (भराय ऋत्वियं भागं सु भरत) सबके पालन पोषण करनेवाले इन्द्रको ऋतुओंके योग्य यज्ञभाग दो । (शुचिपे क्रन्द दिष्ट्ये वायवे प्र) जो शुद्ध अन्न-जलका उपभोग करता है और जिसके शीघ्रतासे जानेके समय शब्द होता है, उस वायुको भी उसका भाग दो । (यः गौरस्य पयसः पीतिं आनशे) जो शुद्ध पवित्र पुष्टिवर्धक गौके दूधका पान करता है । (सर्वतातिं अदितिं आ वृणीमहे) हम सर्वग्राहिणी अदितिकी प्रार्थना करते हैं ॥ २ ॥

[११५६] (सविता देवः नः ऋजूयते) सर्व प्रेरक सूर्य देव हमारे सरलता चाहनेवाले और (सुन्वते यजमानाय वयः पाकवत् आ साविषत्) अभिषव कर्ता यजमानको पाकसे युक्त अन्न प्रदान करे । (यथा देवान् प्रतिभूषेम) जिससे हम देवोंको संतुष्ट कर सके और उन्हें भूषणवत् होवें । (सर्वतातिं अदितिं आ वृणीमहे) सर्व कल्याणकारी अदिति देवीकी हम प्रार्थना करते हैं ॥ ३ ॥

इन्द्रो अस्मे सुमना अस्तु विश्वहा राजा सोमः सुवितस्याध्येतु नः ।
यथायथा मित्रधितानि संदधु—रा सर्वतातिमदितिं वृणीमहे ४
इन्द्र उक्थेन शवसा परुर्दधे बृहस्पते प्रतरीतास्यायुषः ।
यज्ञो मनुः प्रमतिर्नः पिता हि क—मा सर्वतातिमदितिं वृणीमहे ५
इन्द्रस्य नु सुकृतं दैव्यं सहो ऽग्निर्गृहे जरिता मेधिरः कविः ।
यज्ञश्च भूद्विदथे चारुरन्तम आ सर्वतातिमदितिं वृणीमहे ६ [१६]

न वो गुहा चकृम भूरि दुष्कृतं नाविष्ट्यं वसवो देवहेळनम् ।
माकिर्नो देवा अनृतस्य वर्पस आ सर्वतातिमदितिं वृणीमहे ७
अपामीवां सविता साविषन्न्य—ग्वरीय इदप सेधन्त्वद्रयः
ग्रावा यत्र मधुषुदुच्यते बृह—दा सर्वतातिमदितिं वृणीमहे ८
ऊर्ध्वो ग्रावा वसवोऽस्तु सोतरि विश्वा द्वेषांसि सनुतर्युयोत ।
स नो देवः सविता पायुरीड्य आ सर्वतातिमदितिं वृणीमहे ९

[११५७] (इन्द्रः अस्मे विश्वहा सुमनाः अस्तु) इन्द्र हमारे प्रति प्रतिदिन प्रसन्न रहे । (राजा सोमः नः सुवितस्य अध्येतु) राजा सोम हमारे स्तोत्र सुने । (यथायथा मित्रधितानि संदधुः) जिससे सर्व मित्रका-प्रभुका दिया हुआ प्रिय धन हमें प्राप्त होवे । (सर्वतातिं अदितिं आ वृणीमहे) सर्वोत्पादक अदितिकी हम प्रार्थना-याचना करते हैं ॥ ४॥

[११५८] (इन्द्रः उक्थेन शवसा परुः दधे) इन्द्र प्रशसनीय सामर्थ्यसे हमारे यज्ञकी रक्षा करता है । हे (बृहस्पते) बृहस्पति ! (आयुषः प्रतरीता असि) तू आयुको बढानेवाला है । (यज्ञः मनुः प्रमतिः नः पिता कम्) और यज्ञीय, उत्तम विचारशील बुद्धियुक्त और बुद्धिमान इन्द्र हमारा पालक-पिता है, वह हमें सुख दे । (सर्वतातिं अदितिं आ वृणीमहे) सर्व ग्राहिणी अदितिकी हम प्रार्थना करते हैं ॥ ५ ॥

[११५९] (इन्द्रस्य नु सुकृतं दैव्यं सहः अग्निः गृहे) तेजस्वी इन्द्रकाही निश्चयसे उत्तम रीतिसे सम्पादित और देवोंका हितकारक बलयुक्त अग्नि हमारे यागगृहमें है । वह (जरिता मेधिरः कविः यज्ञः च भूत्) देवोंकी स्तुति करनेवाला, बुद्धिमान्, क्रान्तदर्शी और पूज्य है । (विदथे चारुः अन्तमः) वह यज्ञार्ह और रमणीय अग्नि हमारे अति समीपही है । (सर्वतातिं अदितिं आ वृणीमहे) हम सर्वोत्पादक अदितिकी प्रार्थना करते हैं ॥ ६ ॥

[११६०] हे देवो ! (वः गुहा भूरि दुष्कृतं न चकृम) तुम्हारे परोक्षमें मैंने कोई पाप नहीं किया है, (आविष्ट्यं देवहेळनं न) और प्रकटरूपमें जिससे तुम्हें क्रोध आवे, ऐसा कोई कार्य मैंने नहीं किया है । हे (वसवः) सर्वव्यापक देवो ! हे (देवाः) देवो ! (नः अनृतस्य वर्पसः माकिः) हमें मर्त्य देहकी प्राप्ति न होवे ॥ ७ ॥

[११६१] (सविता अमीवां अप साविषत्) सर्वप्रेरक सविता देव हमारे कष्टप्रद रोग आदिको दूर करे । (अद्रयः वरीयः इत् न्यक् अप सेधन्तु) उदार पर्वताभिमानी देव अत्यंत बडे पापोंको अनर्थोंको भी दूर करें । (यत्र ग्रावा मधुषुत् बृहत् उच्यते) जहां मधुर सोमके अभिषव प्रस्तरकी भलीभांति स्तुति की जाती है । (सर्वतातिं अदितिं आ वृणीमहे) हम सर्व कल्याणकारी अदितिकी प्रार्थना करते हैं ॥ ८ ॥

[११६२] हे (वसवः) देवो ! (सोतरि ग्रावा ऊर्ध्वः अस्तु) सोमको निचोडनेका पत्थर ऊपर रहे । (विश्वा द्वेषांसि सनुतः युयोत) तुम हमारे सब छिपे हुए शत्रुओंको दूर करो । (सः सविता देवः नः पायुः ईड्यः) वह सवितादेव हमारा पालक, वंदनीय और स्तुत्य है । (सर्वतातिं अदिति आ वृणीमहे) सर्वोत्पादक अदितिकी हम प्रार्थना करते हैं ॥ ९ ॥

ऊर्जं गावो यवसे पीवो अत्तन ऋतस्य याः सदने कोशे अङ्ग्ध्वे ।
तनूरेव तन्वो अस्तु भेषजमा सर्वतातिमदितिं वृणीमहे १०
क्रतुप्रावा जरिता शश्वतामव इन्द्र इद्भद्रा प्रमतिः सुतावताम् ।
पूर्णमूधर्दिव्यं यस्य सिक्तय आ सर्वतातिमदितिं वृणीमहे ११
चित्रस्ते भानुः क्रतुप्रा अभिष्टिः सन्ति स्पृधो जरणिप्रा अधृष्टाः ।
रजिष्ठया रज्या पश्व आ गोस्तूतूर्षति पर्यग्रं दुवस्युः १२ [१७](११६५)

(१०१)

१२ बुधः सौम्यः। विश्वे देवा, ऋत्विजो वा। त्रिष्टुप्; ४, ६ गायत्री; ५ बृहती; ९, १२ जगती।

उद्बुध्यध्वं समनसः सखायः समग्निमिन्ध्वं बहवः सनीळाः ।
दधिक्रामग्निमुषसं च देवीमिन्द्रावतोऽवसे नि ह्वये वः १
मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वमायुधारं कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः २ (११६७)

[११६३] हे (गावः) गायो ! तुम (यवसे पीवः ऊर्जं अत्तन) गोचर भूमिपर विचरण करके वर्धित घास खाओ और बलकारक दुग्धरस प्रदान करो। (याः ऋतस्य सदने कोशे अङ्ग्ध्वे) जो यज्ञगृहमें और गोष्ठमें रखा है, वह भी खाओ। (तनूः एव तन्वः भेषजम् अस्तु) तुम्हारा दूध सोमरसके औषधके समान हमें पोषक होओ। (सर्वतातिं अदितिं आ वृणीमहे) सर्व ग्राहिणी अदितिकी हम प्रार्थना करते हैं ॥ १० ॥

[११६४] (क्रतुप्रावा जरिता शश्वतां इन्द्रः इत्) समस्त कर्मोंका पूर्ण करनेवाला, सबोंसे स्तवित और कालके अनुसार सबको जरायुक्त करनेवाला इन्द्र ही (सुतावतां अवः भद्रा प्रमतिः) सोमको निचोडनेवालोंका संरक्षक और अत्यंत स्तुत्य है। (यस्य सिक्तये ऊधः पूर्ण) जिसके पान करनेके लिये ही सोम कलश पूर्णतया भरे हुए रहते हैं। (सर्वतातिं अदितिं आ वृणीमहे) हम सर्वोत्पादक अदितिकी प्रार्थना करते हैं ॥ ११ ॥

[११६५] हे इन्द्र ! (ते भानुः चित्रः) तेरा प्रकाश आश्चर्यजनक, (क्रतुप्राः अभिष्टिः) हमारे कर्मोंको पूर्तता देनेवाला और सबके लिए इष्ट है। (ते स्पृधः जरणिप्राः अधृष्टाः सन्ति) तेरी इच्छाएं स्तोताओंकी मनःकामना पूर्ण करनेवाली और अजय्य- किसीसे न दबनेवाली हैं। जिस प्रकार (दुवस्युः रजिष्ठया रज्या गोः पश्वः अग्रं परि तूतुर्षति) दुवस्यु नामक ऋषि अतीव सरल रस्सीके द्वारा गायका अग्रभाग शीघ्र खींचता है, उसी प्रकार मैं अति सरल स्तुतिसे तेरी ओर वेगसे आता हूं ॥ १२ ॥

[१०१]

[११६६] हे (सखायः) मित्रो ! (समनसः उत् बुध्यध्वम्) समान चित्त होकर जागो ! (बहवः सनीडाः अग्निं सं इन्धध्वम्) बहुतसे मिलकर एक समान स्थानमें रहते हुए अग्निको प्रज्वलित करो। मैं (दधिक्रां अग्निं उषसं च देवीं इन्द्रावतः वः अवसे नि ह्वये) दधिक्रा, अग्नि और उषा देवीको- इन्द्रके साथ हमारी रक्षा करनेके लिये बुलाता हूं ॥ १ ॥

[११६७] हे (सखायः) मित्रो ! (मन्द्रा कृणुध्वम्) आनन्दमय मदकर स्तोत्र करो। (धियः आ तनुध्वम्) उत्तम कर्मोंका विस्तार करो। (अरित्रपर्णीं नावं कृणुध्वम्) हल-दण्डवाली और वार लगानेवाली नौकाको बनाओ। (आयुधा अरं इष् कृणुध्वम्) अनेक अस्त्रशस्त्रको अच्छी तरहसे पर्याप्त मात्रामें बनाओ। (प्राञ्चं यज्ञं प्र नयत) उत्तम यज्ञका अनुष्ठान करो ॥ २ ॥

युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम् ।
गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमेयात् ३
सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ४
निराहावान् कृणोतन सं वरत्रा दधातन ।
सिञ्चामहा अवतमुद्रिणं वयं सुषेकमनुपक्षितम् ५
इष्कृताहावमवतं सुवरत्रं सुषेचनम् । उद्रिणं सिञ्चे अक्षितम् ६ [१८]

प्रीणीताश्वान् हितं जयाथ स्वस्तिवाहं रथमित् कृणुध्वम् ।
द्रोणाहावमवतमश्मचक्रमंसत्रकोशं सिञ्चता नृपाणम् ७
व्रजं कृणुध्वं स हि वो नृपाणो वर्म सीव्यध्वं बहुला पृथूनि ।
पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोच्चमसो दृंहता तम् ८

[११६८] हे मित्रो ! (सीरा युनक्त) हलोंको जोतो । (युगा वि तनुध्वम्) जुओंको विस्तृत करो । (कृते योनौ इह बीजं वपत) उत्तम तैयार किये क्षेत्रमें यहां बीजको बोओ । (नः गिरा श्रुष्टिः सभरा असत्) हमारी प्रशंसनीय स्तुति-प्रार्थनासे अन्न अत्यंत पुष्ट होवे और (सृण्यः नेदीय इत् पक्वं एयात्) दातरी पके धान्यके पास आवे ॥ ३ ॥

[११६९] (देवेषु धीराः कवयः सुम्नया सीरा युञ्जन्ति) देवोंपर श्रद्धा रखनेवाले बुद्धिमान् विद्वान् लोग सुख प्राप्त करनेके लिये हल आदिको जोतते हैं और (युगा पृथक् वि तन्वते) अनेक युगोंको अलग करते हैं ॥ ४ ॥

[११७०] हे मित्रो ! (आहावान् निः कृणोतन) गौओं- पशुओंके पानी पीनेके बहुत स्थान बनाओ । (वरत्राः सं दधातन) रज्जुओंको परस्पर जोडो । (वयं उद्रिणं सुषेकं अनुपक्षितं अवतं सिञ्चामहै) हम उत्तम भरनेसे जलयुक्त, उत्तम रीतिसे भूमि-खेत सींचनेमें समर्थ और अक्षय कूपसे जल लेकर सींचें ॥ ५ ॥

[११७१] (इष्कृत-आहावं सुवरत्रं सु-सेचनं उद्रिणं अक्षितं अवतं सिञ्चे) उत्तम जलपानके स्थानसे सुसज्जित, सुन्दर रज्जुसे युक्त, उत्तम रीतिसे सेचन करने योग्य, जलसे पूर्ण, और अक्षय कूपसे में सिंचाई करता हूं ॥ ६ ॥

[११७२] (अश्वान् प्रीणीत) अश्वों-बैलोंको घास-जल आदिसे संतुष्ट करो । (हितं जयाथ) खेतमें रखे हुए हितकारक अन्न-धान्यको प्राप्त करो । (स्वस्तिवाहं रथं इत् कृणुध्वम्) सुखपूर्वक सरलतासे धान्य ले जानेवाले सुंदर रथको अवश्य बनाओ । (नृपाणं अंसत्रकोशं अश्मचक्रं द्रोण-आवाहं अवतं सिञ्चत) मनुष्योंके पीने योग्य, कवचके समान आवरणयुक्त, पत्थरका बनाया हुआ चक्रसे युक्त, काष्ठके बने जलपात्रसे युक्त, जलाधार कूपको प्राप्त कर उससे सींचो ॥ ७ ॥

[११७३] (व्रजं कृणुध्वम्) गोष्ठ-गोशालाएं अच्छी प्रकार बनाओ । (सः हि वः नृपाणः) वही निश्चयसे तुम्हारे लिये, मनुष्यों आदिके जलपानके लिये उपयुक्त है । (बहुला पृथूनि वर्म सीव्यध्वम्) अनेक वडे कवचोंको सीयो । (अधृष्टाः आयसीः पुरः कृणुध्वम्) शत्रुसे अजेय, लोहकी बनी, अस्त्र-शस्त्रादिसे सुसज्ज दृढतर नगरियें बनाओ । (वः चमसः मा सुस्रोत्) तुम्हारा चमस, पात्र भी चूए नहीं; (तं दृंहत) उसको भी दृढ करो ॥ ८ ॥

आ वो धियं यज्ञियां वर्त ऊतये देवा देवीं यजतां यज्ञियामिह ।
सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः ९

आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः ।
परि ष्वजध्वं दश कक्ष्याभि- रुभे धुरौ प्रति वह्निं युनक्त १०

उभे धुरौ वह्निरापिब्दमानो ऽन्तर्योनेव चरति द्विजानिः ।
वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ११

कपृन्नरः कपृथमुद्दधातन चोदयत खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं सबाध इह सोमपीतये १२[१८](११७७)

(१०२)

१२ मुद्गलो भार्म्यश्वः । द्रुघण, इन्द्रो वा । त्रिष्टुप्; १, ३, १२ बृहती ।

प्र ते रथं मिथूकृत- मिन्द्रोऽवतु धृष्णुया ।
अस्मिन्नाजौ पुरुहूत श्रवाय्ये धनभक्षेषु नोऽव १

[११७४] हे (देवाः) देवो ! (वः यज्ञियां धियं ऊतये आ वर्ते) मैं तुम्हारी परमेश्वरको प्राप्त करने योग्य बुद्धिको संरक्षणके लिये प्रेरित करता हूं। (यज्ञियां देवीं यजतां इह) यज्ञार्ह, तेजस्वी और पूज्य बुद्धिको तुम इस यज्ञभूमिमें धारण करो। (सा नः दुहीयत्) वह बुद्धि हमारी अभिलाषा पूर्ण करे। जैसे (यवसा इव गत्वी गौः) घास, भुस अन्नादिको खाकर गोष्ठमें गाय (सहस्रधारा पयसा मही गौः) सहस्र धाराओंसे दूध देती है वैसे ॥९॥

[११७५] हे अध्वर्यु ! (ईं द्रोः उपस्थे हरिं आ सिञ्च) इस काठके पात्रमें रखे हुए हरितवर्ण सोमको सिञ्चित करो। (अश्मन्मयीभिः वाशीभिः तक्षतः) प्रस्तरमय कुठारोंसे पात्र तैयार करो। (दश कक्ष्याभिः परि स्वजध्वम्) दस अंगुलियों-रज्जुओंसे पात्रको वेष्टन करके धारण करो। (उभे धुरौ वह्निं प्रति युनक्त) रथकी दोनों धुराओंमें वाहक पशुको योजित करो ॥ १० ॥

[११७६] (उभे धुरौ आपिब्दमानः वह्निः योनौ अन्तः इव द्विजानिः चरति) रथकी दोनों धुराओंको शब्दायमान करके रथवाहक बैल वैसेही विचरण करता है, जैसे दो स्त्रियोंका स्वामी क्रीडा करता है। (वनस्पतिं वने आस्थापयध्वम्) काठके शकटको वनमें स्थापित करो। अनन्तर (सु नि दधिध्वम्) उत्तम रीतिसे सोमको उसमें स्थिर करो। और (उत्सं अखनन्तः) परम रसको परिश्रम करके प्राप्त करो ॥ ११ ॥

[११७७] हे (नरः) मनुष्यो ! इन्द्र (कपृत्) परमसुख देनेवाला है। उस (कपृथं उत् दधातन) सुखके दाता प्रभु इन्द्रको अपने हृदयमें धारण करो और (वाजसातये चोदयत खुदत) अन्न देनेके लिये बल, ऐश्वर्य लाभके लिये इसे प्रेरित करो, उसकी स्तुति करो तथा उससे शान्ति-आनंद प्राप्त करो। (इह निष्टिग्र्यः पुत्रं इन्द्रं ऊतये सबाधः) इस लोकमें निष्टिग्री-अदितिके पुत्र इन्द्रको हमारी रक्षाके निमित्त, पीडाओंसे दुःखित तुम (सोमपीतये आच्यावय) सोमपानके लिये सब प्रकारसे प्राप्त करो ॥ १२ ॥

[१०२]

[११७८] हे मुद्गल ! (ते मिथूकृतं रथं धृष्णुया इन्द्रः अवतु) तेरे असहाय रथकी दुर्धर्ष इन्द्र रक्षा करे। हे (पुरुहूत) बहुस्तुत इन्द्र ! (अस्मिन् श्रवाय्ये आजौ धनभक्षेषु नः अव) इस प्रख्यात संग्राममें धनोपार्जनके समय हमारी रक्षा कर ॥ १ ॥

उत् स्म वातो वहति वासो अस्या अधिरथं यदजयत् सहस्रम् ।
रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना २

अन्तर्यच्छ जिघांसतो वज्रमिन्द्राभिदासतः ।
दासस्य वा मघवन्नार्यस्य वा सनुतर्यवया वधम् ३ (११८०)

उद्नो ह्रदमपिबज्जर्हृषाणः कूटं स्म तृंहदभिमातिमेति ।
प्र मुष्कभारः श्रव इच्छमानो ऽजिरं बाहू अभरत् सिषासन् ४

न्यक्रन्दयन्नुपयन्त एन-ममेहयन् वृषभं मध्य आजेः ।
तेन सूभर्वं शतवत् सहस्रं गवां मुद्गलः प्रधने जिगाय ५

ककर्दवे वृषभो युक्त आसी-दवावचीत् सारथिरस्य केशी ।
दुधेर्युक्तस्य द्रवतः सहानस ऋच्छन्ति ष्मा निष्पदो मुद्गलानीम् ६ [२०]

उत प्रधिमुदहन्नस्य विद्वा-नुपायुनग्वंसगमत्र शिक्षन् ।
इन्द्र उदावत पतिमघ्न्याना-मरंहत पद्याभिः ककुद्मान् ७

[११७९] (यत् अधिरथं सहस्रं अजयत्) जिस समय रथपर चढकर मुग्‌दलकी पत्नी मुग्‌दलानीने सहस्रों गायोंको जीता, उस समय (अस्याः वासः वातः उत् वहति) इसके वस्त्रका संचालन वायुने किया। (गविष्टौ मद्गलानी रथीः अभूत्) गायोंको जीतनेके समय मुग्‌दलानी सारथि हुई । (इन्द्रसेना भरे कृतं वि अचेत्) और शत्रुके हन्ता इन्द्रकी सेना संग्राममें किये विजयलाभ और गायोंको ले आयी ॥ २ ॥

[११८०] हे (इन्द्र) इन्द्र ! (जिघांसतः अभिदासतः अन्तः वज्रं यच्छ) मारनेकी इच्छा करनेवाले और आक्रमण करनेवाले शत्रुओंके ऊपर फेंक। हे (मघवन्) धनवान् इन्द्र ! (दासस्य वा आर्यस्य वा सनुतः वधं यवय) दास वा आर्य शत्रुके गूढ रूपसे किये शस्त्र प्रयोगको दूर कर ॥ ३ ॥

[११८१] (उद्नः ह्रदं जर्हृषाणः अपिबत्) इस वृषभने जलसे भरे जलाशयको आनंदोत्साहित होकर पी लिया। (कूटं तृंहत् स्म) और अपनी सिंगोंसे पर्वतशृंगको खोदकर वह (अभिमातिं एति) शत्रुपर आक्रमण करता है। (मुष्कभारः) उसका अण्डकोष लम्बायमान है। (श्रवः इच्छमानः सिषासन् अजिरं बाहू प्र अभरत्) वह यशकी इच्छा करके और ऐश्वर्यको चाहता हुआ वेगसे दोनों तीखे सींगोंको बढाते हुए आक्रमणके लिये आ रहा है ॥ ४ ॥

[११८२] (एनं वृषभं उपयन्तः नि अक्रन्दयन्) मनुष्योंने इस वृषभे पास जाकर उसे गरजाया और (आजेः मध्ये अमेहयन्) युद्धके बीचमें उससे मूत्र त्याग कराया ! (तेन मुद्गलः सुभर्वं शतवत् सहस्रं गवां प्रधने जिगाय) उसीसे मुग्‌दलने पुष्ट और उत्तम आहारपटु सैकडों सहस्रों गायोंको युद्धमें जीता ॥ ५ ॥

[११८३] (ककर्दवे वृषभः युक्तः आसीत्) शत्रुओंके साथ युद्ध करनेके लिये रथमें वृषभ योजित किया गया, (अस्य केशी सारथिः अवावचीत्) उसकी केशधारिणी सारथि मुग्‌दलानी गर्जना करके उत्तेजित करने लगी। (अनसा सह युक्तस्य द्रवतः दुधेः निष्पदः मुद्गलानीं ऋच्छन्ति स्म) रथमें जोते गये वृषभके साथ दौडते हुए, दुर्धर और सज्जित योद्धा मुग्‌दलानीके पीछे गये ॥ ६ ॥

[११८४] (उत विद्वान् अस्य प्रधिं उदहन्) और ज्ञानी मुग्‌दलने इस रथकी धुरा-चक्रको अच्छी प्रकारसे प्राप्त किया और (अत्र वंसगं शिक्षन् उपायुनक्) बडी निपुणतासे वृषभको रज्जुसे बांधकर रथमें जोता । इस प्रकार (इन्द्रः अघ्न्यानां पतिं उत् आवत्) इन्द्रने गायोंके पति उस वृषभको बचाया । अनन्तर (ककुद्मान् पद्याभिः अरंहत) वह श्रेष्ठ वृषभ बडे वेगसे मार्गपर चला ॥ ७ ॥

शुनमंष्ट्राव्यंचरत् कपर्दी वंरत्रायां दार्वानह्यमानः ।
नृम्णानिं कृण्वन् बहवे जनाय गाः पंस्पशानस्तविंषीरधत्त ८

इमं तं पंश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम् ।
येनं जिगायं शतवंत् सहस्रं गवां मुद्गलः पृतनाज्येषु ९

आरे अघा को न्वि१त्था ददर्श यं युञ्जन्ति तम्वा स्थापयन्ति ।
नास्मै तृणं नोदकमा भंर॒न्त्युत्तरो धुरो वहति प्रदेदिंशत् १०

परिवृक्तेवं पतिविद्यमानट् पीप्यांना कूर्चक्रेणेव सिञ्चन् ।
एषैष्यां चिद्रथ्यां जयेम सुमङ्गलं सिनंवदस्तु सातम् ११

त्वं विश्वंस्य जगंत॒श्चक्षुरिन्द्रासि चक्षुषः ।
वृषा यदाजिं वृषणा सिषांससि चोदयन् वध्रिणा युजा १२ [२१] (११८९)

[११८५] (वरत्रायां दारुं आनह्यमानः) रज्जुओंसे रथाङ्गको सब प्रकारसे बांधता हुआ, (कपर्दी अष्ट्रावी शुनं अचरत्) जटाजूटवाला और चाबुक धारण करनेवाला वह सुखपूर्वक विचरण करने लगा। (बहवे जनाय नृम्णानि कृण्वन्) बहुत लोगोंको अभिलषित धनोंको दिया और (गाः पस्पशानः तविषीः अधत्त) गायोंको स्पर्श करते करते उसने महान् बलको धारण किया ॥ ८ ॥

[११८६] (इमं तं वृषभस्य युञ्जं द्रुघणं पश्य) इस उस वृषभके मित्र लकडीके बनाये हुए शस्त्रको देख। (काष्ठाया मध्ये शयानम्) यह संग्राममें सब शत्रुओंका हिंसित करके सुखसे पडा हुआ है। (येन मुद्गलः शतवत् सहस्रं गवां पृतनाज्येषु जिगाय) जिसके द्वारा मुगदलने सैकडों, हजारों गायोंको युद्धमें जीता था ॥ ९ ॥

[११८७] (अघा आरे इत्था कः नु ददर्श) जो शत्रुरूपी दुःखों-पापोंको समीपमें करता है, ऐसे शुद्ध निर्मलको किसीने देखा है ? (यं युञ्जन्ति तं उ आस्थापयन्ति) जो रथमें योजित किया जाता है, वही उसपर प्रहरणके लिये बैठाया जाता है। (अस्मै तृणं न उदकं न आ भरन्ति) इसके लिये घास और जल नहीं लाया जाता है। (उत्तरः धुरः वहति प्रदेदिशत्) तो भी यह रथकी धुराका भार वहन करता है और स्वामीको अत्यंत विजयी करता है ॥ १० ॥

[११८८] (परिवृक्ता इव पतिविद्यं पीप्याना आनट्) परित्यक्त स्त्री जिस प्रकार पतिको प्राप्त करके उत्कंठित होती है, और (कूचक्रेण इव सिञ्चन्) जैसे मेघ पृथिवीपर चक्रवत् होकर वर्षा करता है, उसी प्रकार मुगदलानीने बाणोंकी वर्षा की। (एसएष्या रथ्या जयेम) अनेक गो-संघोंकी इच्छा करनेवाले हम उसके सारथ्यसे शत्रुओंको अपहृत गौओंका विजय प्राप्त करें; (सातं सिनवत् सुमङ्गलं अस्तु) और सुखप्रद अन्नके समान हमें बहुत धन प्राप्त होवें ॥ ११ ॥

[११८९] हे (इन्द्र) इन्द्र ! (त्वं विश्वस्य जगतः चक्षुषः चक्षुः असि) तू सारे जगत्के प्रकाशकका भी आंख है। (यत् वृषा आजिं वध्रिणा युजा वृषणा चोदयन् सिषाससि) क्योंकि तू बलवान् और अभिलषित कामनाओं पूर्ण करनेवाला है; संग्राममें तू रथमें दो अश्वोंको रज्जुसे एकत्र बांधकर प्रेरित करता हुआ विजय प्राप्त करता है ॥ १२ ॥

(१०३)

१३ ऐन्द्रोऽप्रतिरथः । इन्द्रः, ४ बृहस्पतिः, १२ अप्वा देवी, १३ मरुतो वा । त्रिष्टुप्, १३ अनुष्टुप् ।

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः १

संक्रन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्यवनेन धृष्णुना ।
तदिन्द्रेण जयत तत् सहध्वं युधो नर इषुहस्तेन वृष्णा २

स इषुहस्तैः स निषङ्गिभिर्वशी संस्रष्टा स युध इन्द्रो गणेन ।
संसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता ३ (११९२)

बृहस्पते परि दीया रथेन रक्षोहामित्राँ अपबाधमानः ।
प्रभञ्जन्त्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम् ४

बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः ।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमा तिष्ठ गोवित् ५

---

[१०३]

[११९०] (आशुः शिशानः वृषभः न भीमः घनाघनः) सर्वव्यापी, शीघ्रतासे शत्रुपर आक्रमण करनेवाला; अत्यंत तीक्ष्ण, वृषभके समान भयंकर, शत्रुहन्ता, (चर्षणीनां क्षोभणः संक्रन्दनः अनिमिषः) मनुष्योंको विचलित करनेवाला, शत्रुओंको रुलानेवाला, सदा सावधान (एकवीरः इन्द्रः) और महान् पराक्रमी वीर इन्द्र है। वह (शतं सेनाः साकं अजयत्) सैकडों सेनाका एक साथ विजय करता है ॥ १ ॥

[११९१] (संक्रन्दनेन अनिमिषेण जिष्णुना युत्कारेण) शत्रुओंको रुलानेवाले–ललकारनेवाले, सदा सावधान, विजयशील, युद्धकारी, (दुश्च्यवनेन धृष्णुना इन्द्रेण तत् जयत तत् सहध्वम्) शत्रुओंसे विचलित वा पराजित न होनेवाले, दृढ इन्द्रकी सहायतासे विजयी बनो, उस शत्रुको पराजित करो। हे (युधः नरः) योद्धा लोगो ! (इषुहस्तेन वृष्णा) वह धनुर्धारी और बलवान् है ॥ २ ॥

[११९२] (सः इषुहस्तैः सः निषङ्गिभिः वशी) वह इन्द्र धनुर्धारी मरुतोंके साथ और तलवार हाथोंमें धारण करनेवालोंके साथ रहता है। (सः इन्द्रः गणेन युधः संस्रष्टा) वह इन्द्र शत्रुओंके संघमें प्रवेश करके युद्ध करनेवाला है। (संसृष्टजित् सोमपाः बाहुशर्धी उग्रधन्वा प्रतिहिताभिः अस्ता) वह शत्रुओंका जीतनेवाला, सोमपान करनेवाला, बाहुबलसे सम्पन्न, प्रचंड धनुर्धर और शत्रुपर फेंके बाणोंसे वह उनका नाश करता है ॥ ३ ॥

[११९३] हे (बृहस्पते) सबोंके पालक देव ! तू (रथेन परि दीय) रथपर चढकर आगे बढ। (रक्षोहा अमित्रान् अपबाधमानः) तू राक्षस हन्ता, शत्रुओंको नष्ट करनेवाला, (सेनाः प्रभञ्जन् प्रमृणः युधा जयन्) नायकों सहित शत्रुओंकी सेनाको छिन्नभिन्न करनेवाला, हिंसक और युद्धसे विजय प्राप्त करनेवाला है। वह तू (अस्माकं रथानां अविता एधि) हमारे रथोंका संरक्षण कर्ता होओ ॥ ४ ॥

[११९४] (बलविज्ञायः स्थविरः प्रवीरः सहस्वान्) तू सब बलोंको विशेष रूपसे जाननेवाला — सर्वाधार, महान्, श्रेष्ठ वीर, तेजस्वी, (वाजी सहमानः उग्रः अभिवीरः अभिसत्वा) वेगवान्–अन्नवान्, शत्रुका पराभव करनेवाला, अत्यंत उग्र, वीरोंसे घिरा हुआ, बलवान् सहचरोंसे युक्त (सहोजाः गोवित्) बल–पराक्रमसे सम्पन्न और गायोंको प्राप्त करनेवाला है। हे (इन्द्र) इन्द्र ! तू (जैत्रं रथं आ तिष्ठ) जयशाली रथपर विराज ॥ ५ ॥

गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म प्रमृणन्तमोजसा ।
इमं सजाता अनु वीरयध्वमिन्द्रं सखायो अनु सं रभध्वम् ६ [२२]

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः ।
दुश्च्यवनः पृतनाषाळयुध्योऽस्माकं सेना अवतु प्र युत्सु ७
इन्द्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ।
देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम् ८
इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुतां शर्ध उग्रम् ।
महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात् ९
उद्धर्षय मघवन्नायुधान्युत् सत्वनां मामकानां मनांसि ।
उद्वृत्रहन् वाजिनां वाजिनान्युद्रथानां जयतां यन्तु घोषाः १०
अस्माकमिन्द्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयन्तु ।
अस्माकं वीरा उत्तरे भवन्त्वस्माँ उ देवा अवता हवेषु ११

[११९५] (गोत्रभिदं गोविदं वज्रबाहुं अज्म जयन्तं) मेघोंको फाडनेवाले-पर्वतभेत्ता जलको प्राप्त करनेवाले, वीर्यवान, संग्राममें विजय प्राप्त करनेवाले, (ओजसा प्रमृणन्तं इमं इन्द्रं) पराक्रमसे शत्रुओंको नाश करनेवाले, हे (सजाताः) एकत्र हुए वीरो ! (अनु वीरयध्वम्) अनुसरण करके, शौर्यका कार्य करो । हे (सखायः) मित्रो ! (इन्द्रं अनु सं रभध्वम्) इन्द्रके अनुकूल होकर तुम्हारा कार्य करो ॥ ६ ॥

[११९६] (इन्द्रः सहसा गोत्राणि अभि गाहमानः) इन्द्र स्वसामर्थ्यसे मेघोंमें प्रवेश करता है । (अदयः वीरः शतमन्युः दुश्च्यवनः पृतनाषाट्) वह शत्रुपर निर्दय, वीर, क्रोधी, अचल-अच्युत, शत्रुओंकी सेनाका पराभव करनेवाली, (अयुध्यः अस्माकं सेनाः युत्सु प्र अवतु) और उसके साथ कोई युद्ध नहीं कर सकता, ऐसा है । वह हमारी सेनाओंकी युद्धमें रक्षा करे ॥ ७ ॥

[११९७] (इन्द्रः आसां नेता) इन्द्र इन सेनाओंका नायक हो, (बृहस्पतिः दक्षिणा यज्ञः सोमः पुरः एतु) बृहस्पति, दक्षिणा, यज्ञ और सोम उसके अग्रभागमें रहें । (अभिभञ्जतीनां जयन्तीनां देवसेनानां अग्रं मरुतः यन्तु) शत्रुमर्दक और जयशील देवसेनाओंके अग्रभागमें मरुत् जांय ॥ ८ ॥

[११९८] (वृष्णः इन्द्रस्य राज्ञः वरुणस्य आदित्यानां मरुतां उग्रं शर्धः) बलवान् इन्द्रका, राजा वरुणका, आदित्योंका और मरुतोंका उत्कृष्ट बल हमारा होवे । (महामनसां भुवनच्यवानां जयतां देवानां घोषः उदस्थात्) महामनस्वी, भुवनोंको कंपा देनेवाले जगत् चालक, विजयी देवोंका घोषनाद ऊपर उठने लगा ॥ ९ ॥

[११९९] हे (मघवन्) धनवान् इन्द्र ! (आयुधानि उद्धर्षय) हमारे अस्त्र-शस्त्रोंको उत्साहित कर । (मामकानां सत्वनां मनांसि उत्) मेरे वीर सैनिकोंके मनोंको भी उत्सुक कर । हे (वृत्रहन्) वृत्रहन्ता इन्द्र ! (वाजिनां वाजिनानि उत्) घोडोंका वेग-बल बढे । (जयतां रथानां घोषाः उत् यन्तु) विजयशील रथोंके निर्घोष नाद उठे ॥ १० ॥

[१२००] (अस्माकं ध्वजेषु समृतेषु इन्द्रः) हमारे ध्वजावाले वीरोंके एकत्र मिलकर जुट जानेपर इन्द्रही रक्षणकर्ता है । (अस्माकं याः इषवः ताः जयन्तु) हमारे जो बाणयुक्त सैन्य हैं, वे विजयी हों । (अस्माकं वीराः उत्तरे भवन्तु) हमारे वीर योद्धा श्रेष्ठ हों । हे (देवाः) देवो ! (हवेषु अस्मान् उ अवत) युद्धमें हमारी भी रक्षा करो ॥ ११ ॥

अमीषां चित्तं प्रतिलोभयन्ती गृहाणाङ्गान्यप्वे परेहि ।
अभि प्रेहि निर्दह हृत्सु शोकै रन्धेनामित्रास्तमसा सचन्ताम् १२
प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ १३ [२३] (१२०२)

(१०४)

११ अष्टको वैश्वामित्रः । इन्द्रः । त्रिष्टुप् ।

असावि सोमः पुरुहूत तुभ्यं हरिभ्यां यज्ञमुप याहि तूयम् ।
तुभ्यं गिरो विप्रवीरा इयाना दधन्विर इन्द्र पिबा सुतस्य १
अप्सु धूतस्य हरिवः पिबेह नृभिः सुतस्य जठरं पृणस्व ।
मिमिक्षुर्यमद्रय इन्द्र तुभ्यं तेभिर्वर्धस्व मदमुक्थवाहः २
प्रोग्रां पीतिं वृष्ण इयर्मि सत्यां प्रयै सुतस्य हर्यश्व तुभ्यम् ।
इन्द्र धेनाभिरिह मादयस्व धीभिर्विश्वाभिः शच्या गृणानः ३ (१२०५)

[१२०१] हे (अप्वे) पापाभिमानी देवता ! (अमीषां चित्तं प्रतिलोभयन्ती) तू इन शत्रुओंके चित्तको मोहित करती हुई उनके (अङ्गानि गृहाण) शरीरोंके अवयवोंको पकड ले, उनको वश कर । (परा इहि) तू दूरतक जा । (अभि प्र इहि) उनकी ओर आगे बढती जा । (हृत्सु शोकैः निर्दह) उनके हृदयोंको शोकोंसे दग्ध कर । (अमित्राः अन्धेन तमसा सचन्ताम्) हमारे शत्रु अन्धकार युक्त दुःखसे युक्त हों ॥ १२ ॥

[१२०२] हे (नरः) वीर योद्धाओ ! (प्र इत) आगे बढो । (जयत) शत्रुओंपर विजय प्राप्त करो । (इन्द्रः वः शर्म यच्छतु) इन्द्र तुम्हें सुखी करे । (वः बाहवः उग्राः सन्तु) तुम्हारी भुजाएं बलशाली हों, (यथा अनाधृष्याः असथ) कि तुम कभी पराजित न होनेवाले होओ ॥ १३ ॥

[१०४]

[१२०३] हे (पुरुहूत) बहुस्तुत इंद्र ! (तुभ्यं सोमः असावी) तेरे लिये सोम अभिषुत हुआ है ! तू (हरिभ्यां यज्ञं तूयं उप याहि) दोनों घोडोंके द्वारा हमारें यज्ञमें शीघ्रही पधारो । (तुभ्यं विप्रवीराः इयानाः गिरः दधन्विरे) तेरे लिये विद्वान् स्तोता उत्तम स्तुतियोंको सदाके लिये धारण करते हैं । तू (सुतस्य पिब) आकर इस सोमका पान कर ॥ १ ॥

[१२०४] हे (हरिवः) अश्वोंके स्वामी ! (अप्सु धूतस्य नृभिः सुतस्य) पानीमें घुलाकर शुद्ध किया और कर्मकर्ता अध्वर्युओंने निचोडा हुआ सोम (इह पिब) यहां इस यज्ञमें उसका पान कर । पीकर (जठरं पृणस्व) उदरको तृप्त कर । हे (इन्द्र) इन्द्र ! (अद्रयः यं तुभ्यं मिमिक्षुः) पत्थरोंने जो तुम्हारे लिये ही सेचन किया है, हे (उक्थवाहः) स्तुत्य ! (तेभिः मदं वर्धस्व) उनसे तू उत्साहयुक्त होओ ॥ २ ॥

[१२०५] हे (हर्यश्व) हरित रंगके घोडोंके स्वामी इन्द्र ! (वृष्णे तुभ्यं सुतस्य उग्रा सत्या पीतिं प्रयै प्र इयर्मि) सुख और ऐश्वर्यको बरसानेवाले तुझे निचोडा हुआ उग्र और सत्य सोमका पान करनेके लिये जानेकी मैं प्रेरित करता हूं । हे (इन्द्र) इन्द्र ! (शच्या गृणानः) कर्मोंसे और स्तुतिओंसे तू स्तवित होता है । (धेनाभिः विश्वाभिः धीभिः इह मादयस्व) तू स्तुति वचनोंसे और अनेक प्रकारके योग्य कर्मोंसे इस यज्ञमें संतुष्ट तथा तृप्त होओ ॥ ३ ॥

ऊती शचीवस्तव वीर्येण वयो दधाना उशिजं ऋतज्ञाः ।
प्रजावदिन्द्र मनुषो दुरोणे तस्थुर्गृणन्तः सधमाद्यासः ४
प्रणीतिभिष्टे हर्यश्व सुष्टोः सुषुम्नस्य पुरुरुचो जनासः ।
मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इन्द्र तव सूनृताभिः ५ [२४]

उप ब्रह्माणि हरिवो हरिभ्यां सोमस्य याहि पीतये सुतस्य ।
इन्द्रं त्वा यज्ञः क्षममाणमानड् दाश्वाँ अस्यध्वरस्य प्रकेतः ६
सहस्रवाजमभिमातिषाहं सुतेरणं मघवानं सुवृक्तिम् ।
उप भूषन्ति गिरो अप्रतीत—मिन्द्रं नमस्या जरितुः पनन्त ७
सप्तापो देवीः सुरणा अमृक्ता याभिः सिन्धुमतर इन्द्र पूर्भित् ।
नवतिं स्रोत्या नव च स्रवन्ती—र्देवेभ्यो गातुं मनुषे च विन्दः ८
अपो महीरभिशस्तेरमुञ्चो ऽजागरास्वधि देव एकः
इन्द्र यास्त्वं वृत्रतूर्ये चकर्थ ताभिर्विश्वायुस्तन्वं पुपुष्याः ९

[१२०६] हे (शचीवः इन्द्रः) शक्तिमान् इन्द्र ! (तव ऊती वीर्येण प्रजावत् वयः दधानाः) तेरी रक्षा और सामर्थ्यसे संतति युक्त अन्न प्राप्त करनेवाले (उशिजः ऋतुज्ञाः मनुषः दुरोणे गृणन्तः) तेरी कामना करनेवाले, यज्ञकर्मको अच्छी तरह जाननेवाले तेरे भक्त यज्ञगृहमें स्तुति करते हुए (सधमाद्यासः तस्थुः) सबके साथ आनन्द अनुभव करते हुए विराजते हैं ॥ ४ ॥

[१२०७] हे (हर्यश्व इन्द्र) हरितवर्ण घोडोंवाले इन्द्र ! (सुष्टोः सुषुम्नस्य पुरुरुचः ते) उत्तम रीतिसे स्तुत्य, सुखयुक्त धनके स्वामी, अत्यंत प्रदीप्त– श्रेष्ठ तेरे (प्र–नीतिभिः जनासः सूनृताभिः स्तोतारः) उत्तम नीतियों–कार्योंसे लोग, उत्तम वाणोयोंसे तेरी स्तुति करनेवाले होकर (वितिरे मंहिष्ठां तव ऊति दधानाः) अन्योंको भी दान करने और स्वयं पार होनेके लिये भी तेरी श्रेष्ठ रक्षा प्राप्त करते हैं ॥ ५ ॥

[१२०८] हे (हरिवः) अश्वयुक्त इन्द्र ! (सुतस्य सोमस्य पीतये हरिभ्यां ब्रह्माणि उप याहि) तू अभिषुत किया गया सोम पीनेके लिये अपने दोनों घोडोंके द्वारा सारे यज्ञोंमें आता है । हे (इन्द्र) इन्द्र ! (क्षममाणं त्वा यज्ञः आनट्) क्षमाशील शक्तिमान् तुझे यज्ञ प्राप्त होता है। (अध्वरस्य प्रकेतः दाश्वान् असि) यज्ञीय विषयको उत्तम रीतिसे जाननेवाला तू अविनाशी कर्मफलका दाता है ॥ ६ ॥

[१२०९] (सहस्रवाजं अभिमातिषाहं सुतेरणं) अपरिमित बलका स्वामी, शत्रुओंको पराजित करनेवाले, सोमपानमें रमनेवाले, (मघवानं सुवृक्तिं अप्रतीतं इन्द्रं गिरः उप भूषन्ति) धनवान्, सुस्तुत और युद्धसे पराङ्मुख न होनेवाले इन्द्रकोही स्तुतियां विभूषित करती हैं। (जरितुः नमस्याः पनन्त) स्तोताकी नमस्कार सहित पूजाएं उसका ही वर्णन करती हैं ॥ ७ ॥

[१२१०] हे इन्द्र ! (सप्त आपः देवीः सुरणाः अमृक्ताः) सात नदियां– रमणीय मनोहर और अमित गतिवाली गङ्गा आदि बहती हैं । हे (इन्द्र) इन्द्र ! (पूर्भित् याभिः सिन्धु अतरः) शत्रु पुरियोंको नष्ट करनेवाला तू गङ्गा आदि सात नदियोंकी सहाय्यतासे समुद्रको तरता है या उसे बढाता है । तुमने (नवतिं नव च स्रोत्याः स्रवन्तीः) निन्यानबे बहती हुई नदियोंका (देवेभ्यः मनुषे च गातुं विन्दः) देवों और मनुष्योंके लिये मार्ग परिष्कृत किया है ॥८॥

[१२११] हे इन्द्र ! (महीः अपः अभिशस्ते अमुञ्चः) जिन महान् जीवनप्रद जलोंको दुष्टोंके आक्रमणसे मुक्त किया, (आसु देवः एकः अधि अजागः) उनके ऊपर तू ही एक अद्वितीय देव प्रकाशक होकर जागता रहता है । हे (इन्द्र) इन्द्र ! (त्वं याः वृत्रतूर्ये चकर्थ) तू जिन जलोंको वृत्र–हत्यामें समर्थ करता है, (ताभिः विश्वायुः तनुं पुपुष्याः) उनके द्वारा ही सबका जीवनदाता होकर सबके शरीरोंको पुष्ट करता है ॥ ९ ॥

वीरेण्यः क्रतुरिन्द्रः सुशस्ति—रुतापि धेना पुरुहूतमीट्टे ।
आर्दयद्वृत्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः १०
शुनं हुवेम मघवानमिन्द्र—मस्मिन् भरे नृतमं वाजसातौ ।
शृण्वन्तमुग्रमूतये समत्सु घ्नन्तं वृत्राणि संजितं धनानाम् ११ [२५] (१२१३

(१०५)

११ कौत्सो दुर्मित्रः सुमित्रो वा । इन्द्रः । उष्णिक्; १ गायत्री वा; २, ७ पिपीलिकमध्या; ११ त्रिष्टुप् ।

कदा वसो स्तोत्रं हर्यत आव श्मशा रुधद्वाः । दीर्घं सुतं वाताप्याय १
हरी यस्य सुयुजा विव्रता वे—रर्वन्तानु शेपा । उभा रजी न केशिना पतिर्दन् २
अप योरिन्द्रः पापज आ मर्तो न शश्रमाणो बिभीवान् । शुभे यद्युयुजे तविषीवान् ३
सचायोरिन्द्रश्चर्कृष आँ उपानसः सपर्यन् । नदयोर्विव्रतयोः शूर इन्द्रः ४
अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै । वनोति शिप्राभ्यां शिप्रिणीवान् ५ [२६]

[१२१२] (इन्द्रः वीरेण्यः क्रतुः सुशस्तिः उत अपि) इन्द्र महान् योद्धा, कर्तृत्ववान् और उत्तम स्तुति करने योग्य है । (धेना पुरुहूतं ईट्टे) वाणी अत्यंत पूज्य इन्द्रकी ही स्तुति करती है । और जो (वृत्रं आर्दयत् उ) वृत्रका नाश करता है, (लोकं अकृणोत्) प्रकाशको उत्पन्न करता है (शक्रः अभिष्टिः पृतनाः ससाहे) और शक्तिशाली उसने आक्रमणकारी होकर शत्रुओंकी सेनाओंको भी पराजित किया ॥ १० ॥

